विद्यापीठ-ग्रन्थमाला

[प्रथमं पुष्पम्]

शैवाद्वयविंशतिका

कुलपति प्रो. वाचस्पति-उपाध्यायस्य 'नैवेद्य' - पुरोवाचा पुरस्कृता

सम्पादकः

श्रीजनार्दनपाण्डेयः

श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठम्

(मानितविश्वविद्यालयः)

नई दिल्ली

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

विद्यापीठ-ग्रन्थमाला

[प्रथमं पुष्पम्]

शैवाद्वयविंशतिका

कुलपति प्रो. वाचस्पति-उपाध्यायस्य 'नैवेद्य'-पुरोवाचा पुरस्कृता

सम्पादकः

श्रीजनार्दनशास्त्रीपाण्डेयः

नवदेहल्याम्

२०५४ वैक्रमाब्द   १९१९ शकाब्द   १९९७ खैस्ताब्द

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

प्रकाशक:
कुलसचिवः
श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठस्य
(मानितविश्वविद्यालयस्य)
नई दिल्ली - ११० ०१६

❐

प्राप्ति-स्थानम्
प्रकाशन-विभागः
श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठस्य
(मानितविश्वविद्यालयस्य)
नई दिल्ली - ११० ०१६

❐

प्रथमं संस्करणम् – १००० प्रतिरूपाणि

मूल्यम् – ७५.०० रूप्यकाणि

❐

मुद्रक :
शिव-शक्ति कम्प्यूटर प्रोसेस
डी ३५/७७, जंगमवाडीमठ
वाराणसी - २२१ ००१

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

VIDYĀPĪṬHA-GRANTHAMĀLĀ
[Vol.1]

ŚAIVĀDVAYAVIṀŚATIKĀ

FOREWORD BY
PROF. VACHASPATI UPADHYAYA
VICE-CHANCELLOR

EDITED BY
ŚRĪ JANĀRDANAŚĀSTRI PĀṆḌEYA

NEW DELHI

1997

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

Published by :
Registrar,
Shri Lal Bahadur Shastri Rashtriya Sanskrit Vidyapeeth
(Deemed University)
New Delhi - 110016

❑

Available at :
Publication Department
Shri Lal Bahadur Shastri Rashtriya Sanskrit Vidyapeeth
(Deemed University)
New Delhi - 110016

❑

First Edition - 1000 Copies

Price - Rs. 75.00

❑

Printed by :
Shiva-Shakti Computer Process
D. 35/77, Jangamawadimath
Varanasi - 221 001

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नैवेद्यम्

अथायं प्रकाश्यते लघुग्रन्थसङ्ग्रहात्मकः **'शैवाद्वयविंशतिका'**ख्यो ग्रन्थः। अत्र च नवसंख्याकानां विद्वद्रत्नानां विंशति-रचनाः सङ्कलिता वर्तन्ते, एताश्च प्रायशोऽप्रकाशिता एव। यदि काचित् कुतश्चित् प्रकाशिताऽपि चेत् पत्रिकादिषु न सा सर्वसुलभा, ग्रन्थरूपत्वाभावात्। प्रायः सर्वेष्वेव सम्प्रदायेषु विदुषां महात्मनां सिद्धानां चैतादृश्यो लघ्व्यो मुक्तकरचना अप्रकाशिता उपेक्षिता एव भवन्ति, फलतस्तत्रोपदिष्टेनातीवमहत्त्वपूर्णेनापि ज्ञानेन जना वञ्चितास्तिष्ठन्ति। एतद्दृष्ट्या **श्रीजनार्दनशास्त्रिपाण्डेयस्य** विभिन्नविषये लघुरचनानामेकत्र सङ्कलनप्रयासोऽतिश्लाघ्य इति मन्ये।

अस्मिन्नेव क्रमे शैवाद्वयसिद्धान्तप्रतिपादनपराणां विंशतिरचनानामयं सङ्ग्रहो विद्यते। अत्र विश्रुतविदुषो महामाहेश्वराचार्यवर्यस्याभिनवगुप्तस्य नव रचनाः सन्ति। तत्र प्रथमस्तन्त्रोच्चयो नाम विशेषेणावधातव्यः। तन्त्रशास्त्रे विशेषेण काश्मीरकशैवतन्त्रे विश्वकोषात्मकं तन्त्रालोकं प्रणीयाचार्येण तत्साररूपस्तन्त्रसारो विरचितः, ऋजुमतीनां कृते तस्यापि दुर्बोधत्वात् तस्यापि साररूपस्तन्त्रोच्चयो निर्मितः। स चायमद्यावधि प्रकाशं नोपगतः। कियत्कालात्पूर्वं वैदेशिकाभ्यां विद्वद्भ्यां प्रो० नियोली-तोरेलाभ्यां मुद्रितः, किन्तु प्रत्याह्निकान्ते ग्रन्थकृता प्रदत्त आह्निकसाररूपोऽपभ्रंशांशस्ताभ्यामनवबोधान्निःसारितः। प्रस्तुते संस्करणे लिपिकर्तॄणां प्रमादात्परम्परया भ्रष्टमपभ्रंशांशं संशोध्य तस्य च संस्कृतच्छायाऽपि प्रदत्ता। एतेन तन्त्रसारस्थोऽप्यपभ्रंशांशः शुद्धतामुपगतः।

अत्र सङ्कलिताः प्रायः सर्वेऽपि लघुग्रन्थाः सङ्ग्रहणीया वर्तन्ते। एतेषां च विषयवस्तु संक्षेपेण प्रास्ताविके द्रष्टुं शक्यते। अत्रत्याः सर्वे लघुग्रन्थाः काश्मीरशैवाद्वयसिद्धान्तप्रतिपादकाः, ग्रन्थकर्तारश्च काश्मीरका एव विद्वांसः। केवलं भक्तिस्तोत्रं वीरशैवाद्वयपरं तत्प्रणेता चावधूतसिद्धः काश्मीरकेतरः। एतेषामेकोनविंशतिग्रन्थानां पाठः काश्मीरिकशारदालिप्यां लिखिताभ्य एव मातृकाभ्यो गृहीत इति प्रामाणिकत्वमेषाम्।

अनेन सङ्ग्रहेण विविधा भ्रान्तयो निराकृताः। पूर्वं मुद्रितायां रहस्यपञ्चदशिकायां सप्तत्रिंशच्छ्लोकाः सन्ति, किन्तु नामास्ति पञ्चदशिका, बिम्बप्रतिबिम्बभावः पूर्वमाचार्येण लघ्वाकारो रचितः, स एव तन्त्रालोक-तृतीयाह्निके परिवर्धितः। बोधोल्लासविलासश्च द्वे

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

पृथक्कृती स्त:। आचार्यभास्करकण्ठस्य वाचिको नमस्कार:, राजानकसाहिबकौलानन्दनाथस्य चित्स्फारसारद्वयप्रबन्धाद्या रचना: शैवाद्वयसिद्धान्तप्रतिपादिका: स्पृहणीया वर्तन्ते।

पण्डितश्रीजनार्दनपाण्डेया विविधविषयेषु पारङ्गमा विशेषतो प्राच्यशैलीकग्रन्थोद्धरणे तत्सम्पादने टीकोट्टङ्कने च पटीयांस: सुचिरं वाराणसीस्थसम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य सरस्वतीभवन-पुस्तकालये सेवां समुपास्य ततो निवृत्ता अद्यापि सारनाथस्थ-केन्द्रीय-उच्च-तिब्बती-शिक्षासंस्थानमाध्यमेन सारस्वत-समाराधने संलग्नधिषणा मनीषिण: प्रकृतग्रन्थस्थस्तोत्रसङ्ग्रहं विधाय संस्कृताधीतिनो भृशमुपाकार्षुरिति तेषां सर्वतोभावेनाभ्युदयं चिरायुष्यं यश:प्रकर्षञ्चातितरामभिलषामि। ग्रन्थस्यास्य प्रकाशनप्रसङ्गेऽस्य मुद्रकाय वाराणसीस्थ-**शिव-शक्ति-कम्प्यूटर्स**-व्यवस्थापकायापि धन्यवादान् समर्पयामि।

विविधविषयेषु विशेषेण दर्शनसम्बन्धिषु स्फुटमुक्तकरचनानां सङ्ग्रहा विदुषामतीवोपकारका: स्युरिति कृत्वा श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठतोऽस्माभिरस्य प्रकाशनं विधाय विपश्चिद्वर्येभ्य: सादरं समर्प्यते।

नवदेहल्याम्
मार्गशीर्षपूर्णिमायाम्,
वि० सं० २०५४

वाचस्पति-उपाध्याय:
कुलपति:
श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठस्य

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

प्रास्ताविकम्

प्रायशो दृश्यते यद् आचार्याणां, सिद्धानां, विदुषामन्येषां महापुरुषाणां च मुक्तकरूपेण कृताः लध्व्यो रचनाः अतीवमहत्त्वमादधाना उपादेयतमाः सत्योऽपि नितरामुपेक्षिता एव तिष्ठन्ति, यतो हि तासां लघुकायत्वाद् ग्रन्थरूपेण प्रकाशनं न भवति, येन जिज्ञासवः पाठकास्तत्रनिर्दिष्टेन महत्त्वपूर्णेन ज्ञानेन वञ्चिता एव भवन्ति। इयं च स्थितिः प्रायेण सर्वेष्वेव सम्प्रदायेषु वर्तते। काशीहिन्दूविश्वविद्यालयस्थकेन्द्रीय ग्रन्थालये १९८३-८४ ईसवीये कार्यं कुर्वता मयाऽनुभूतं यत् तत्र शारदालिपिमयाःबहवो लघुग्रन्था अप्रकाशिता एव सन्ति, येषु रुचिरा ज्ञानवर्द्धिनी च सामग्री विद्यते। तत एव केचन इमे लघु ग्रन्था उद्धृत्य यथामति सम्पाद्य च संप्रति प्रकाश्य विदुषां पुरत उपस्थापप्यन्ते।

अत्र च येषां विपश्चित्प्रवराणां या या रचना संकलितास्तासां संक्षेपेण परिचय इत्थं वर्तते —

महामाहेश्वराचार्याणामभिनवगुप्तपादानामत्र ९ रचनाः संकलिताः सन्ति। ईसवीय-दशम शताब्देरुत्तरार्धे प्रादुर्भूतोऽयं महापुरुषः संस्कृतज्ञानां कृते नास्त्यपरिचितः, तन्त्रालोक-अभिनवभारती-ध्वन्यालोकलोचन-ईश्वरप्रत्यभिज्ञाविवृति-विवृतिविमर्शिन्यादि-विशालतमानां ग्रन्थानां प्रणेतुरस्य प्रायशः चतुश्चत्वारिंशद् ग्रन्था विरचिताः श्रूयन्ते, तेष्विमे लघुग्रन्था अत्र संकलिताः —

१. तन्त्रोच्चयः

विद्वच्चक्रचूडामणिनाऽभिनवगुप्तेन समग्रं तन्त्रशास्त्रस्य विषयवस्तुजातं तन्त्रालोकाख्ये ग्रन्थे व्याकृतम्, ततश्च नेदं वस्तुजातं सर्वैरवगाहितुं शक्यमितिकृत्वा तत्रत्यान् प्रमुखाविषयान् संक्षिप्य द्वाविंशत्याह्निकात्मकस्तन्त्रसारो रचितः। यथा स्वयमुक्तं तेनैव —

विततस्तन्त्रालोको विगाहितुं नैव शक्यते सर्वैः।
ऋजुवचनविरचितमिदं तु तन्त्रसारं ततः शृणुत ।। (तं. सा. १/२)

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अस्यापि तन्त्रसारस्य २२ आह्निकानि पुनः संक्षिप्यात्यन्त ऋजुमतीनां कृते सः लघुकायमिमं तन्त्रोच्चयं नाम ग्रन्थं प्रणीतवान्, यथा ग्रन्थान्ते स्वयमुक्तं तेन —

आलोकसारद्वयभिन्नमेतत्तन्त्रं त्रिधा व्याकुरुतेस्म गुप्तः। (तन्त्रोच्चय १०)

अस्मिंश्च तन्त्रोच्चये दस आह्निकानि सन्ति, तत्र प्रथमाह्निकात् पञ्चमं यावत् तन्त्रसारस्य पञ्चाह्निकेषु यानि पद्यानि सन्ति तान्येव व्याकृतानि, यथा — प्रथमे तन्त्रसारप्रथमाह्निकस्थं 'अज्ञानं किल बन्धहेतु०' 'आत्मा प्रकाशवपुरेष०' इति पद्यद्वयं व्याख्यातम्। द्वितीये द्वितीयाह्निकस्थम् 'उपायजालं न शिवं प्रकाशयेदिति। तृतीये तृतीयस्थम् 'अन्तर्विभाति०' इति। चतुर्थे चतुर्थस्थं 'योनिश्चयः पशुजनस्य०' इति। पञ्चमे च पञ्चमस्थं 'स्वप्रकाशम्०' इत्यादि पद्यत्रयं व्याख्यातम्। षष्ठे च षष्ठाह्निकास्थं 'संविद्रूपस्यात्मनः०' इतिपद्यं व्याख्याय षष्ठसप्तमाह्निकस्था दिक्कालयोर्विस्तृतिर्व्याकृता। सप्तमे च तन्त्रसारस्य ८, ९, १० आह्निकानां संक्षेपः तत्त्वनिरूपणाख्यो दर्शितः। अष्टमे ११ तः १९ पर्यन्तानामाह्निकाना सारः पदर्शितः। नवमे नित्यनैमित्तिककर्मकाण्डस्य स्वरूपं निरूपितं यच्च तन्त्रसारे प्रायो विंश आह्निके दृश्यते। दशमे तूपसंहरता सबाह्याभ्यन्तरेणात्मसमर्पणेन गुरोर्भगवतः पूजां कृत्वा आनृण्यं प्रतिपादितम्, इदमेवास्य विषयवस्तु।

अत्र च पञ्चमाह्निके सप्तविश्रान्तीनाम्-उन्मिषत्, उन्मिषित, संघट्टात्मकीभूतेत्यवस्थात्रयम् आनन्द-उद्भव-कम्प-निद्रा-घूर्णीति पञ्चावस्थासु विभज्यं विर्गत्रयं च तत्र संयोज्य १०८ भेदा अभिहिताः, नैतत्तन्त्रालोके तन्त्रसारे वा दृश्यते। अपरं च पर्वदिनानां गणना उभयोरपि ग्रन्थयोर्मार्गशीर्षादारभ्य कार्तिकपर्यन्तं गुप्तमहोदयेन क्रियते किन्तु तन्त्रोच्चये चैत्रादारभ्य फाल्गुनपर्यन्तं कृतेति वैशिष्ट्यमत्रावलोक्यते।

लघु ग्रन्थस्यास्यैका मातृका पाण्डुलिपीनाभन्वेषणाय गतेन मया रीवाँनगरे एकस्य विदुषो गृहे दृष्टा तत्रैव प्रतिलिपीकृता च, द्वितीया हिन्दू विश्वविद्यालयीय ग्रन्थालयतः प्राप्ता। अन्या चैका () महोदयाभ्यां संपाद्य मुद्रिता लब्धा, पूर्वोक्तयोर्मातुकयोस्तु अपभ्रंशाख्योंऽशः यथावदेव प्रायशोऽशुद्ध आसीत्, स च विदुषा एच्. सी. भायाणी महोदयेन सम्यक् शोधितः, तस्य संस्कृतच्छाया च विहिता। अतो मूलमातृकास्थः, भायाणी महोदयेन संशोधितः, तस्य संस्कृतच्छायेति पाठत्रयमेवार्थ मया दत्तम्। एतदर्श-महं श्रीभायाणीमहोदयस्य भूरिशो घन्यवादैर्महदुपकृतिं स्मरामि। मुद्रितायां तु सम्पादक-महोदयाभ्यामपभ्रंशांशो पूर्णतया निःसारित एव।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

एवं मातृकात्रयमाधृत्य सम्पादितोऽयं तन्त्रोच्चयः विदुषां समक्षमुपस्थापितः। ममानवधानेन संजातानां त्रुटीनां कृते क्षन्तव्योऽहं सूचनीयश्चेति प्रार्थये कृपाधनान् विपश्चित्प्रवरान्।

२. देहस्थदेवतास्तोत्रम्

अत्रोक्तं ग्रन्थकृता प्रारम्भ एव —

देहो देवालयः प्रोक्तः, स्वात्मा देवः सनातनः।
त्यजेदज्ञाननिर्माल्यं सोऽहंभावेन पूजयेत् ।। इति।।

अत्र देहे प्राणरूपं गणपतिम्, अपानरूपं वटुकम्, अवधानरूपं सद्गुरुम्, चिन्मयरूपमानन्दभैरवम्, विमर्शरूपामानन्दभैरवीम्, बुद्धिरूपां ब्रह्माणीम्, अहङ्काररूपां शाम्भवीम्, मनःस्वरूपां कौमारीम्, श्रुति (श्रोत्रं) रूपां वैष्णवीम्, त्वग्रूपां वाराहीम्, चक्षूरूपामिन्द्राणीम्, जिह्वारूपां चामुण्डाम्, घ्राणरूपां महालक्ष्मीम्, आत्मरूपं च क्षेत्रपतिं पूजयेदिति निर्दिष्टम्। एतेन देहस्थानां प्राणादीनामेभिर्देवैः सह गूढ आध्यात्मिकः सम्बन्धः सूच्यते नित्यार्चनं च सम्पद्यते।

३. पञ्चश्लोकी

एकं प्रकीर्णं पत्रं मयोपलब्धम्, यत्रैते पञ्चश्लोका लिखिताः सन्ति। पत्रस्यान्तिमे कोणे लिखितमस्ति 'अभिनवगुप्तपादानाम्' — इति, किमपि शीर्षकं नास्ति। न ज्ञायत इमे श्लोका गुप्तपादानां कस्मिंश्चिद् ग्रन्थे वर्तन्ते वा मुक्तकरूपेण रचिता वा। संग्राह्या इतिकृत्वा पञ्चश्लोकीति शीर्षकं दत्त्वा मयाऽत्र संगृहीताः।

४. परमाद्वयद्वादशिका

परमार्थद्वादशिकेत्यस्या नाम केषुचिद्धस्तलेखेषु दृश्यते, अत्र च किं तावदद्वयं शिवस्वरूपं परमार्थतः वर्तते इति विवेचितम्।

५. बिम्बप्रतिबिम्बभावः

जीवात्मपरमात्मनोः बिम्बप्रतिबिम्बभावोऽत्र विवेचितः। गुप्तपादानां रचनासु गणनायां बिम्बप्रतिबिम्बभाव इति पृथक् गण्यते, किन्तु इमे एव श्लोकाः तन्त्रालोकस्य तृतीयाह्निके वर्तन्ते। मन्ये पूर्वमेवैतस्त्रयोविंशतिश्लोकात्मको ग्रन्थस्तैर्विरचितः स्यात् पश्चाच्च तन्त्रालोकप्रणयनावसरेश्लोकातिमानादाय २९३ श्लोकात्मकं तृतीयाह्निकं निर्मितं स्यात्, बिम्बप्रतिबिम्बमावस्यां अस्मिन् ग्रन्थालयेऽस्य २३ श्लोकात्मिके एव द्वे मातृके स्तः।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

६. बोधपञ्चदशिका

सर्वभावानां स्वभाव एव परमेश्वरः, इदं च भावजातं तस्य शक्तिः, अनयोः शक्ति-शक्तिमतोरभेद एवात्र पञ्चदशश्लोकैर्बोधितः।

७. भैरवस्तोत्रम्

जगतो भरणात् परमेश्वरो भैरव उच्यते, अतो मामपि भरेत्यात्म निवेदनं कविना कृतम्।

८. महोपदेशविंशिका

त्वमहंभावयोरैक्यं प्रतिपादयता जीव एव परमात्मा, अमूर्तिर्विश्वमूर्तिश्च, अतस्तस्यैव पूजा परापूजेति विंशतिश्लोकैरुपदिष्टमत्र।

९. रहस्यपञ्चदशिका

अत्र पञ्चदशपद्यैः संविद्रूपायाः पराम्बायाः स्तुतिर्वर्तते, श्रीमता कान्तिचन्द्रपाण्डेय-महोदयेन "अभिनवगुप्त एन हिस्टोरिकल एण्ड फिलासाँफिकल स्टडी" नामकस्य ग्रन्थस्यान्ते प्रकाशितायां रहस्यपञ्चदशिकायां ३७ पद्यानि दृश्यन्ते, अन्तिमे च पद्ये "इमेऽभिनवगुप्तेन श्लोकाः पञ्चदशेरिताः" अयमंशो वर्तते। हिन्दूविश्वविद्यालयस्थ मातृकायां १५ पद्यानन्तरमेव षोडशे पद्येऽयभंशोऽस्ति येन रहस्यपञ्चदशिकेति नाम्नः सार्थकता भवति।

१०. भक्तिस्तोत्रम्

श्रीमदवधूतसिद्धस्येयं रचना। प्राचीनोऽयं सिद्धः, यतोहि ईसवीयदशमशताब्दीकेन सोमदेवसूरिणा स्वीये यशस्तिलकचम्पूकाव्येऽयमुद्धृतः, अभिनवगुप्तेन क्षेमराजेन च स्वीयग्रन्थेषु स्मृतः। अस्मिन् स्तोत्रेऽनेन शिवस्तुतिव्याजेन सिद्धान्तशैवागमसिद्धान्ताः प्रतिपादिताः। पञ्चषष्टिपद्यात्मकेऽस्मिन् स्तोत्रे मङ्गलानन्तरं पञ्चमपद्यं यावत् ग्रन्थप्रयोजन ततः ३६ पद्यं यावदन्यमतानां चर्चा ततश्च ५७ यावत् पौराणिकाख्यानिदर्शनपूर्वकं स्वसिद्धान्तस्थापनम् अन्ते च स्वोद्धाराय भगवतः प्रार्थना विद्यते।

११. बोधोल्लासविलासः

राजानक क्षेमराजस्येयं रचना, अयं च श्रीमद्भिनवगुप्तपदानां शिष्योऽनेकग्रन्थानां रचयिता व्याख्याता च बहुश्रुतो विद्वान बभूव। अस्मिंश्च बोधोल्लासविलासेऽनेन स्वतन्त्रा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

चितिः कथं विश्वनिर्माणे हेतुर्भवति, कथं च चितिरेव संकोचाच्चितं भवति, कथं च तदेव नियमासक्तं सत् सविवेकं मायाप्रमाता विषयासक्तं सदविवेकीनटवत् कृत्रिमां भूमिकां गृह्णाति, कथं च मोक्षलक्ष्मीः प्रवर्तते, इत्यादयोः विषयाः सारल्येन प्रतिपादिताः।

१ २. परमार्चनत्रिंशिका

राजानकनागस्येयं रचना। नागाभिधा बहवो विद्वांसो बभूवुः, तेषु कस्येयं रचनेति निश्चेतुं न शक्यते। अत्र त्रिंशद्भिः पद्यैरनेन प्रतिपादितम् यत् नैके जना स्नानार्चनसमाध्यादि द्वारा परमेश्वरमाराधयन्ति किन्तु येन चित्तशुद्धिर्न भवति व्यर्थमेवतदर्चनम्, अतो येन संविदुदयो भवेत्, स्ववपुश्च विमलबोधनिर्भरं भवेत् तदेव वास्तविकं शिवार्चनं भवतीति।

१ ३. चित्तसन्तोषात्रिंशिका

इयमपि राजानकनागस्यैव रचना। अत्र संसाराततापतप्तं शाशो जन्ममृत्युजनित दुःखकदर्थितं चित्तं निर्मलसुधाब्धिभूतं शिवपदमधिगम्य कथं शान्तिं सन्तोषं च भजते, इतिं विविधोदाहरणैः सरसैः प्रतिपादितम्।

१ ४. नमस्कारवाचिक शिवस्तुतिरूपः

एतच्च राजानकभास्करकण्ठकृताच्चित्तानुबोधशास्त्रादुद्धृत्यात्रोट्टंक्यते। अत्र वाचिकनमस्कारस्य भेदप्रदर्शनपूर्वकं सम्यग्विवेचनं कृत्वा शिवस्य स्तुतिरूपेण समग्रोऽपि तत्त्वाध्वा प्रदर्शितः। भास्करी-मोक्षोपायादिविविधग्रन्थानां प्रणेताऽयं ईसवीय सप्तदश-शताब्द्या उत्तरार्धे प्रादुर्भूतः।

१ ५. परास्तुतिः

योगिनः सहजानन्दस्येयं कृतिः। अत्रानेन परासंवित् स्तुता शैवाचायार्याणां नामानि च व्याजेन प्रदर्शितानि।

१ ६. चित्स्फारसाराद्वयप्रबन्धः

अशान्तमानसं शिष्यं सच्चित्स्वरूपबोधनपूर्वकं स्वात्मतत्त्वं विवेच्य स्थिरमानसं कर्तुमयं विलक्षणः प्रबन्धस्त्रिषष्टिपद्यात्मकः श्रीसाहिब्कौलेन निर्मितः। अयं च सिद्धः ईसवीय सप्तदश शताब्दीकः।

१ ७. शिवजीवदशकम्

दशश्लोकात्मकं जीवात्मपरमात्मनोरैक्यप्रदर्शकमिदमपि श्रीसाहिब्कौलेन निर्मितम्।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

१८. सहजार्चनषष्टिका

सहजं नाम स्वाभाविकम्। अत्र षष्टिश्लोकैर्विदुषा साहिब्कौलेन प्रतिपादितं यत् मया स्वाभाविकरूपेण सदसद्वा यत्क्रियते तत्सर्वमात्मार्चनमेवेति।

१९. स्वात्मोपलब्धिशतकम्

आचार्य सिल्हणेनात्र विविधशास्त्रकारैर्विद्वद्भिश्च कृताऽऽत्मनः परिभाषा विवेचिताऽस्ति, अन्ते च विकल्पनिवहत्यागात् सर्वाहंभावभावनात्, स्वानुभूत्यैकशीलत्वात् परानन्दैकविश्रामात्, मध्यमार्गावलम्बनात्, सर्ववृत्त्युपसंहारात् स्वात्मोपलब्धिर्भवतीति सिद्धान्तितम्।

२०. बोधविलासः

अस्मिन् त्रयोविंशात्मकपद्यमये ग्रन्थे विज्ञानभैरव-सिद्धान्तसंग्रहादिग्रन्थदिशा आत्मबोधप्रकारः प्रदर्शित। अत्र ग्रन्थकर्त्रा स्वनाम न प्रकाशितं हर्षदत्तसूनुरिति पितृनाम निदर्शितम्।

एवं नव विद्वद्रत्नानां विंशतिसंख्याकैर्लघुग्रन्थरत्नैर्गुम्फितेयं, शैवाद्वयविंशतिका मया संकलिता सम्पादिता च विपश्चित्प्रवराणां पुरत उपस्थाप्यते। अत्र अवधूतसिद्धस्य भक्तिस्तोत्रं विहाय सर्वे ग्रन्थाः काशीहिन्दूविश्वविद्यालयस्थ-केन्द्रीयग्रन्थालयतः शारदाख्य-काश्मीरिकलिप्यां लिखिता एव मया गृहीताः, यतो हि एते सर्व एव ग्रन्थकर्तारः काश्मीरिका आसन्।

आबाल्यात् संस्कृतभाषाप्रचारप्रसारे बद्धपरिकरा देहलीस्थकेन्द्रीयलालबहादुरशास्त्रि संस्कृत विद्यापीठस्य कुलपतयो विद्वद्वर्याः श्रीवाचस्पत्युपाध्यायमहोदया भूरिशो धन्यवादैः सभाज्यन्ते यैरिमां विंशतिकां प्रकाशयाग्रेऽप्यप्रकाशितपाण्डुलिपीनां प्रकाशनमार्गः प्रशस्तीकृतः।

अन्ते च कृपाधनान् विपश्चित्प्रवरान् साञ्जलिबन्धं प्रार्थये यन्ममानवधानतयाऽत्र संजातानां त्रुटीनां कृते क्षन्तव्योऽहमिति।

केन्द्रीय उच्चतिब्बती शिक्षासंस्थान
सारनाथ, वाराणसी

विद्वच्चरणचञ्चरीकः
जनार्दनशास्त्रीपाण्डेयः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

विषयानुक्रमणिका

पृष्ठे

नैवेद्यम् *v*

प्रास्ताविकम् *vii*

ग्रन्थानुक्रमणी

ग्रन्थः

महामहेश्वराचार्यस्याभिनवगुप्तस्य

१. तन्त्रोच्चयः ३
२. देहस्थदेवतास्तोत्रम् ३०
३. पञ्चश्लोकी ३२
४. परमाद्वयद्वादशिका ३३
५. बिम्बप्रतिबिम्बवादः ३६
६. बोधपञ्चदशिका ३९
७. भैरवस्तोत्रम् ४१
८. महोपदेशविंशिका ४२
९. रहस्यपञ्चदशिका ४४

अवधूतसिद्धस्य

१०. भक्तिस्तोत्रम् ४७

राजानकक्षेमराजस्य

११. बोधोल्लासविलासः ५९

राजानकनागस्य

१२. परमार्चनत्रिंशिका ६५
१३. चित्तसन्तोषत्रिंशिका ६८

भास्करकण्ठस्य

१४. वाचिक नमस्कारः शिवस्तुतिरूपः ७३

योगिनःसहजानन्दस्य

१५. परास्तुतिः ९५

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

साहिब्कौलानन्दनाथस्य

१६. चित्स्फारसाराद्वयप्रबन्ध: ९९

१७. शिवजीवदशकम् १०९

१८. सहजार्चनषष्टिका ११०

आचार्यसिल्हणस्य

१९. स्वात्मोपलब्धिशतकम् १२१

हर्षदत्तसूनोः

२०. बोधविलास: १३१

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

महामाहेश्वराचार्यस्याभिनवगुप्तस्य

१. तन्त्रोच्चयः
२. देहस्थदेवतास्तोत्रम्
३. पञ्चश्लोकी
४. परमाद्वयद्वादशिका
५. बिम्बप्रतिबिम्बवादः
६. बोधपञ्चदशिका
७. भैरवस्तोत्रम्
८. महोपदेशविंशिका
९. रहस्यपञ्चदशिका

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तन्त्रोच्चयः

प्रथममाह्निकम्

[1]विमलकलाश्रयाभिनवसृष्टिमहाजननी
भरिततनुश्च पञ्चमुखगुप्तरुचिर्जनकः ।
तदुभययामलस्फुरितभावविसर्गमयं
हृदयमनुत्तरामृतकुलं मम संस्फुरतात् ।।१।।

परहितकरणनियुक्तो गुरुभिस्तन्त्रोच्चयमिति ग्रन्थम् ।
अभिनवगुप्तो रचयति मितमभिजनहृदयविनोदि ।।२।।

[2]अज्ञानं किल बन्धहेतुरुदितः शास्त्रे

विपरीतविनिश्चयनिमित्तो हि संसारः। तथा हि —

मलं तत्स्मृतम्

अज्ञानमेव हि मलम् । अतश्च —

पूर्णज्ञानकलोदये तदखिलं निर्मूलतां गच्छति ।

अपूर्णे हि ज्ञाने यावत्येव [3]सम्यग् ज्ञातताभावतो विमुक्तिस्तावति ज्ञेयीभूते तावदुत्तीर्णप्रमातृत्वावभासात् । पूर्णे तु ज्ञाने समस्तोत्तीर्णं समस्तात्मभूतं च प्रमातृतत्त्वं शिवरूपमेव भातीति न कुत्रचिदंशभागेऽस्याज्ञानं स्यात् ।

ध्वस्ताशेषमलात्मसंविदुदये मोक्षश्च

न किंचिन्मोक्षो नाम, अपि त्वज्ञानकालुष्यापगमे सर्वोत्तीर्णसर्वात्मभूतपूर्णस्वतन्त्र निर्मलसंवित्तत्त्वप्रकाश एव मोक्षः।

तेनामुना

शास्त्रेण प्रकटीकरोमि निखिलं यज्ज्ञेयतत्त्वं भवेत् ।।

---

१. 'तन्त्रसारे' परात्रीशिकाविवरणे 'ऽप्ययमेव' मङ्गलश्लोको वर्तते ।
२. तन्त्रसारे उपो०, पृ०५
३. सम्यग्ज्ञातं तावती विमु - मु०

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तच्च परमेश्वरेण शास्त्रेष्वेव पूर्वं निरूपितम्। सर्वोत्तीर्णत्वस्य सर्वात्मभूतत्वस्य चाभिधानात्। ननु प्रकाशस्वभावो यद्ययं भगवांस्तत्कस्मादस्याज्ञानमप्रकाशात्मकम्? कथं वा तन्निवर्तते? आह —

[१]आत्मा प्रकाशवपुरेष शिवः स्वतन्त्रः
स्वातन्त्र्यनर्मरभसेन निजं स्वरूपम्।
सञ्छाद्य यत्पुनरपि प्रथयेत पूर्णं
तच्च क्रमाक्रमवशादथवा त्रिभेदात्॥

यस्मात्स्वरूपमाच्छाद्य प्रकटयति तत एवायं परमेश्वरः स्वतन्त्रः। स हि प्रकाशस्वभावः। अत एव केनापि चैकतमेन प्रकारेण न प्रकाशते। तदप्रकाशता तथा स्यादिति सर्वात्मना स प्रकाशत इति प्रकाशतैव स्वस्वतन्त्रताऽस्य। यच्च स्वरूप प्रकाशनम्, तच्चाक्रमात्। [२]देहविलये शिवतैव क्रमवशादथवा त्रिभेदात् शाक्तादि-रूपतयेति वक्ष्यामः।

आह च —

मातृकापाठः

[३]एहु पआसऊउ अत्ताणत सच्छन्दउ ढक्कइ णिअऊउ।
पूणु पअढइ झढि अह कमवस्व एहत परमर्थिण शिवरसु॥

शोधितः पाठः

एहु पआस-रूउ अत्ताणउ सच्छंदउ ढक्कइ णिअ-रुअउ।
पुणु (वि) पअडइ झत्ति अह कम-वसु एहउ परमत्थिण सिवरसु॥

संस्कृतच्छाया

एष प्रकाशरूपः आत्मा स्वच्छन्दं छादयति निजरूपम्।
पुनरपि प्रकटयति झटिति-अथ क्रमवशः एषः परमार्थेन शिवरसः॥१॥

॥ इति तन्त्रोच्चये प्रथममाह्निकम्॥

---

१. त० सा० १/५, पृ०७
२. इतः पूर्वं 'यस्य तदैव' इत्यधिकं - मु०
३. त० सा०, पृ०७

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

द्वितीयमाह्निकम्

तत्र सः परमेश्वरप्रकाशः कस्यचिदविरतप्रबन्धतया पुनरुपायनिरपेक्षतया भाति। एकवारं गुरुवचनमीदृशं सम्यगवधार्यम् , तद्यथा —

[1]उपायजालं न शिवं प्रकाशयेत्

युक्तं चैतत्, यतः —

घटेन किं भाति सहस्रदीधितिः ।

अतः शिवप्रसादादेव विश्वं भाति। विश्वमध्ये समस्त उपायवर्गः ।

विवेचयन्नित्थमुदारदर्शनः
स्वयम्प्रकाशं शिवमाविशेत् क्षणात् ।।

अनवच्छिन्नविश्वोत्तीर्णविश्वात्मभूतसंविद्रूपतया स्वयं प्रकाशत इति यावत् । आह च —

मा०पा०

[2]जहि जहि फुरण फुरइ सो सअलउ परमेसरु भासइ मइ अमलउ ।
अत्ता नत सो श्चिव परमत्यिण इअ जानअ कज्ज परमत्थिण ।।

शो०पा०

जहिं जहिं फुरणु फुरइ सो सअलउ परमेसरु भासइ महु अमलउ ।
अत्ताणउ सो चिय परमत्थिण इउ जाणहु कज्जु परमत्थि ण ।।

सं०छाया

यत्र यत्र स्फुरणं स्फुरति स सकलः परमेश्वरः भासते मह्यम् अमलः ।
आत्मा स एव परमार्थेन इदं जानीथ कार्यं परमस्ति न ।।२।।

।। इति द्वितीयमाह्निकम् ।।

---

१. त० सा०, ६, पृ० ९
२. ,, पृ० ९

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तृतीयमाह्निकम्

कस्यचित्तु परमेश्वरप्रकाशस्तदीयायां स्वातन्त्र्यशक्तौ निर्ज्ञातायां प्रकाशते। यदिदं विश्वं तत् प्रकाशते तावत् । बहिः प्रकाशितमपि तु तदवश्यं परामृश्यते। परामर्शेन विना प्रकाशितमप्यप्रकाशितकल्पम्, यतः परामृश्यते च न बहिःपरामर्शावसरेऽन्तर्मुखतोल्लासस्य संवेदनात् । अन्तश्चेत् परामृश्यते तत्रैवैतत्स्फुरति बहिरपि प्रकाशमानम् । अन्यथा प्रकाशितं न परामृष्टं स्यात्, परामृष्टं च न प्रकाशितं भवेत् । ततश्च प्रकाशपरामर्शेत्युभयमाप्यान्ध्यं भवेत् । एवं च प्रकाशपरामर्शस्वभावमेव संवेदनम् । तदभिन्नाश्च भावाः परामर्शबलाद्-भिन्ना इव प्रतीयन्ते ।

परामर्शात्मिका च परमेश्वरस्य पञ्चाशद्वर्णदेवतामय्यकृत्रिमा संकेतनिरपेक्षा शक्तिरिति स्वशक्त्यैव ममान्तर्विश्वं भाति। देवदत्तोऽपि नामाहमेव संविद्रूपः। तदीयशरीरसुखदुःखादि तु मदीयवद् घटादिवच्च संवेदनदर्पणान्तर्भातीति सिद्धोऽहं स्वातन्त्र्यशक्तिभासितविश्वाभासः परमेश्वरो विभुरेको नित्य इति गुहुर्मुहुर्भावयन् स एव। यतः —

[१]अन्तर्विभाति सकलं जगद्,

क्व?

आत्मनीह

स्वप्रकाशे। कथम् ?,

यद्वद् विचित्ररचना मुकुरान्तराले

एतेन ग्राह्य-ग्राहकभावः कार्यकारणभावो नाश्यनाशकभाव आधार्याधारभाव इत्यादि सर्वं तत्रान्तर्भासमानं समर्थितम्। विचित्रावभासस्य मुकुरेऽप्यस्य दृष्टस्य मुकुराद् भेदानुपपत्तेः।

बोधस्य त्वेष विशेषः—

बोधः परं निजविमर्शरसानुवृत्त्या विश्वं परामृशति

तत एव स्वप्रकाशः स्वतन्त्रश्च ।

---

१. त० सा०, पृ०१९

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नो मुकुरस्तथा तु ।।

अन्यं प्रति हि स प्रकाश्यः परामर्शनीयश्चेति परतन्त्रो जडः। आह च —

मा०पा०

[१]संवेअण निम्मल दप्पणम्मि सअलं फुरत्त निअसारं ।
आमरिसण रस सरहस विमट्ठरूअं सइं भाइ ।।१।।

इअ सुणअ विमलमेणं निज अप्पाणं समत्थवत्थमअं ।
जो जोअय सो परभैरइ वोब्ब परणिव्वइं लहइ ।।२।।

शो०पा०

संवेअण-णिम्मल-दप्पणम्मि सअलं फुरंत-णिअ-सारं ।
आमरिसण-रस-सरहस्स-विमट्ठ रूअं सअं भाइ ।।१।।

इअ सुणिअ विमलमेणं णिअ-अप्पाणं समत्यवत्थुमअं ।
जो जोअइ सो पर-भइरवो व्व पर-णिब्बुइं लहइ ।।२।।

सं०छा०

संवेदन-निर्मल-दर्पणे सकलं स्फुरन्निजसारम् ।
आमर्शनरससरहस्य-विमृष्टरूपं स्वयं भवति ।।१।।

ज्ञाति श्रुत्वा विमलमेनं निजात्मानं समस्तवस्तुमयम् ।
यः पश्यति स परभैरव इव परनिर्वृतिं लभते ।।२।।

।। इति तृतीयमाह्निकम् ।।

---

१. त० सा०, पृ०१९,२०

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

चतुर्थमाह्निकम्

यस्य त्वित्यमविकल्पकः समावेशो नोदेति स सविकल्पकभावनया सत्तर्करूपया संस्कुरुते। विकल्पश्च संसारोचितेभ्यो विकल्पेभ्यो विपरीतस्वभावश्चेत्, प्रबन्धेन प्रवृत्तो भवति, तत्सा पारमेश्वरी शुद्धविद्या शक्तिरेव, न तत्र विकल्पतया शङ्कितव्यम् । तथाहि—

[1]यो निश्चयः पशुजनस्य जडोऽस्मि

देहमात्रस्वभावोऽहमिति मत्वा, तथा

कर्मसंपाशितोऽस्मि ।

देहव्यतिरिक्ते ऽपि सत्यात्मनि। तथा

मलिनोऽस्मि,

क्षीणोऽथ कर्मस्वपि मलयोगात्, तथा,

परेरितोऽस्मि ।।

मल प्रक्षयोऽपि म नादिशिवप्रसादात् । इत्येवं लौकिको वा धार्मिको वा रूद्रभूतो वा सिद्धान्त-दर्शनमुक्तो पशुरेव । स च तथाविधामुकामुकविकल्पदार्ढ्यबलात् । अतश्च —

इत्येतदन्यद्दृढनिश्चयलाभसिद्ध्या

नाहं जडः संविन्मात्रस्वभावत्वात् । न मम कर्माणि पाशाः, तानि मम प्रत्युत स्वातन्त्र्यात् क्रियाशक्तिविजृम्भामात्रम् । नाहं मलिनः, मलो हि मम स्वात्मप्रच्छादनात्मिका क्रीडा। नाहं परेरितः। न मत्तः परः कश्चिदस्ति, पूर्णसंविदेकपरमार्थत्वादित्येव।

सद्यः पतिर्भवति विश्ववपुश्चिदात्मा ।

[2]यथा यथा निश्चय ईदृगाप्यते
तथा विधेयं परयोगिना सदा ।
न वस्तुयाथात्म्यविहीनया दृशा
विशङ्कितव्यं शिशुदेशना गणैः ।।

---

१. त० सा० पृ०३२
२. त० सा० पृ०३२

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तेन यत्किञ्चित्कुर्वता ईदृङ्निश्चयलाभे ऽवधातव्यम् । आह च—

मा०पा०

[१]जह जह जस्सु जहिं चिव पप्फुरइ अज्झवसाउ ।
तह तह तस्सु तहिं चिव तारिसु होइ पभाउ ।।१।।

हतं मलिणउ हतं पसु हतं आ अह सअलभावपडलवत्तिरित्तउ ।
इअ दढनिच्छअ णिअ लिअहिअहह फुरइणाम कह जिस्स परतत्त्वउ ।। २।।

शो०पा०

जह जह जस्सु जहिं चिय पफुरइ अज्झवसाउ ।
तह तह तस्सु तहिं चिय तारिसु होइ पभाउ ।।१।।

हउं मलिणउ हउं पसु हउं आअह सअल-भाव-पडल-वइरित्तउ ।
इअ दढ-णिच्छअ-णिअलिअ-हिअअह फुरइ णामु कह जसु परतत्तउ ।। २।।

सं०छा०

यथा यथा यस्य यत्र एव प्रस्फुरति अध्यवसायः ।
तथा तथा तस्य तत्र एव तादृशः भवति प्रभावः ।।१।।

अहं मलिनः अहं पशुः अहम् अस्य सकल-भाव-पटल-व्यतिरिक्तः ।
इति दृढनिश्चय-निगडित-हृदयस्य स्फुरति नाम कथं यस्य परतत्त्वम् ।। २।।

मा०पा०

[२]पर सिव तरणिकिरण दढ पातरि ।
अमिअ हिअअ कमल रअ महुरि ।।१।।

अणि अइ सुन्नत परिमल रोणु ।
कमलणि हंत सिरिणु महुणि ।।२।।

विलसअ तत्तरसुणि अतत्ति विसइ ।
रीहुरि अविपनिपला इअर अणि लच्छवि मुइरि ।।३।।

---

१. त० सा० पृ० ३३
२. नास्ति तन्त्रसारे

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

शो०पा०

पर-सिव-तरणि-किरण-दढ पत्तरि ।
अमिअ-हिअअ-कमलि रअ-महुअरि ।।१।।
जणिअइ सुन्नउ परिमल-रेणु ।
कमलि लिहंत सिरिणुं महुणि ।।२।।
विलसइ तत्त-रसु णिअ-तत्त विसइ ।
पलाअइ रअणिअ लच्छवि मुइरि ।।३।।

सं०छा०

परशिवतरणिकिरणदृढपत्रे । अमृतहृदयकमले रत-मधुकरे ।।१।।
जन्यते शून्यपरिमलरेणुः । कमले लिह्यति [श्रियं नु] मधुनि ।।२।।
विलसति तत्त्वरसः निज-तत्त्व-विषये ।
पलायति रजन्यां लक्ष्यते मुञ्चति ।।३।।

।। इति चतुर्थमाह्निकम् ।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

पञ्चममाह्निकम्

एवमनन्तरेण शाक्त उपायो दर्शितः। यस्तु सत्तर्केण न निर्मलस्वभावमासादयति तस्य ध्यानादिकमुच्यते। तत्र —

[1]स्वप्रकाशं समस्तात्मतत्त्वं मात्रादिकं त्रयम्।।
अन्तःकृत्य स्थितिं ध्यायेद्धृदयानन्दधामनि।।

तद् द्वादशमहाशक्तिरश्मिचक्रेश्वरं विभुम्।
व्योमभिर्निःसरद् बाह्ये ध्यायेत् सृष्ट्यादिभासकम्।।

तद् ग्रस्तसर्वबाह्यान्तर्भावमण्डलमात्मनि।
[2]विश्राम्येत् पुनरप्येवमित्यभ्यासात् प्रथात्मनः।।

इति ध्यानमुक्तम्। तच्च बुद्धिलक्षणेनाणुना भेदनिश्चयात्मनैव कृतमित्याणवम्। कश्चित् प्राणोच्चारणक्रमेण स्वरूपलाभमेति, तत्र स्वभावे [3]पूर्वं बोधात्मनि आक्रान्त्यां प्राणस्तिष्ठति। ततोऽसौ प्राण उल्लसति। मेयं पूरयति। तत्रैकीभवति। सोऽयमुपसंहर्तुमारभते। संहृत्य पूर्णीभवति। षडेता आनन्दभूमीरनुसन्धत्ते। इति सप्तविश्रान्तयः। प्रत्येके च न विश्रान्त्यावभासेन। तस्या विश्रान्तेर्यत् तद्रूपं तमुन्मिषद्रूपमुन्मिषितरूपं सङ्घट्टात्मकीभूतमिति त्रित्वम्। तदेव विसर्गत्रयं व्यक्तादिलिङ्गत्रयं च। तत्रापि प्रत्येकं प्रवेशतारतम्यादानन्द उद्भवः कम्पो निद्रा घूर्णिरित्यवस्थाः, उत्तरोत्तरव्याप्त्युदयात्। त्रयश्च प्रधानं विसर्गा योगिनीति, हृदयानन्द-सम्प्रदायलभ्या इत्यष्टोत्तरशतभेदेयमुच्चारणभूमिः। तत्रैव श्रीसृष्टिसंहारबीजोदय इत्यलम्।

एवं बुद्धिप्राणद्वारेण यः प्रवेशः स आणवः। प्रविष्टस्तु शाक्तशाम्भवधारामेवाधिशेते। आह च —

मा०पा०

[4]जहु जो णिब्बइ धातु उइ रविससिदहण सउद।
आहि दे अणुग आणपहि मच्चिअउल्ल मिउद।।१।।

---

१. त० सा०, पृ० ३७
२. 'विश्राम्यन् भावयेद्योगी स्यादेवं स्वात्मनः प्रथा' इति तन्त्रसारस्थः पाठः।
३. पूर्व - इति मातृकापाठः।
४. तन्त्रसारे नास्ति

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

हिमणिम्म विभासइ आसंहारइज्जि पुणु अउ अहिपुरो बीसगिआ ।
एहु तपसरु पुरो आच्छइणि अबल पसरइ सोच्चिअ परइ संघट्टा ।। २।।

शो० पा०

जहिं जो णिव्वइ धाउ उइ रवि-ससि-दहण-सरूइ ।
आहिंडेविणु गअण-पहि, सु च्चिअ उल्लसि रूइ ।।१।।
हिअअम्मि विभासइ उवसंहरइ जि पुणु णिअरूअहिं वरु विसमिअ ।
एहु अबसरु वरु अच्छइ णिअबलु पसरइ सो च्चिअ पूरइ संघट्टइ ।। २।।

सं० छाया

यत्र यो निर्वाति धातुः स रवि-शशि-दहन-स्वरूपे ।
आहिण्ड्य गगनपथे स एव उल्लस्य रूपेण ।।१।।
हृदये विमर्शयति उपसंहरति एव पुनः निजरूपे वरं विश्रम्य ।
एष अवसरः वरः अस्ति निजबलं प्रसरति स एव पूरयति संघट्टयति ।। २।।

मा० पा०

आआहिं सत्तावथहिं विसर्ग तति विहुतताहि विपञ्चावघटइ ।
हिअअ विसङ्गतए सत अष्टोत्तर सिव भूमिप ।।३।।
सथ बुद्धि पवण परिसीलणिण पवत्य ।
परिपसिहु भव दुरदलणिण साइत आनन्दभर ।।४।।

शो० पा०

आअहिं सत्तात्थहिं विसज्जइ तिविहु अ ताहिं वि पंचावत्थहिं ।
हिअअ विसंगत ए सअ-अट्ठोत्तर सिव-भूमिए ।।३।।
सत्थ-बुद्धिए पुणु परिसीलणिण पसत्थ ।
परिपसिहु भव-दुह-दलणिण मुइउ आणंदभरु ।।४।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सं० छाया

आभिः सप्तावस्थाभिः विसर्जयति त्रिविधं च ताभिः अपि पञ्चावस्थाभिः।
हृदयविसङ्गतये शतमष्टोत्तर शिवभूमौ ।।३।।
स्वस्थ-बुद्ध्या पुनः परिशीलनेन प्रशस्तम् ।
परिपश्य भव-दुख-दलनेन मुदित आनन्दभरः ।।४।।

।। इति पञ्चममाह्निकम् ।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

षष्ठमाह्निकम्

अधुनेदमभिधीयते— इह द्विविधं वैचित्र्यं लोकस्य भेदभ्रान्तिं करोति, क्रियाकृतं मूर्तिकृतं च। तत एव कालदेशौ भेदकौ प्राहुः। तत्र क्रियाकृतं वैचित्र्यं स्वात्मविजृम्भितमेव पश्यति स्वप्नवत् सङ्कल्पवच्च। तथाहि —

[1]संविद्रूपस्यात्मनः प्राणशक्तिं
पश्यन् रूपं तत्रगं [2]चापि कालम् ।
साकं सृष्टिस्थेमसंहारचक्रै -
र्नित्योद्युक्तो भैरवीभावमेति ।।

संविदेव हि प्रसरन्ती प्राणनानुरूपा [3]सस्पन्दा सती स्पन्दनोच्छलत्वात् कालप्रसारमारभते। इति प्राणशक्तौ सकलं कालं विलापयेत्, तां च संविदीति संविदः स्पन्दितमात्रं यत् तदेव बहिः सृष्टिसंहारानन्त्यवैचित्र्यम्। आह च —

मा० पा०

[4]सअल प्रआस रूउ संवेअण फन्दतरङ्गकलण तहु पाणुर ।
पाणब्भन्तरम्मि परिणिट्ठिउ सअलउ कालपसरु परिआणु ।।१।।

जह उल्लसइ जह विण्णिरुज्जइ पवनसत्ति तह एहु महेसरु ।
सिट्ठिपलअं भासइअ णिमज्जइ सो अत्ता णउ चित्तह साअरु ।। २।।

शो० पा०

सअल-पआस-रूअ संवेअण फंद-तरंग-कलण तहु पाणु ।
पाणब्भंतरम्मि परिणिट्ठिउ सअलउ काल-पसरु परिआणु ।।१।।

जह उल्लसइ जह वि णिरुज्झइ पअणसत्ति तह एहु महेसरु ।
सिट्ठिपलअं भासइअ णिमज्जइ सो अत्ताणउ चित्तत्त-साअरु ।। २।।

---

१. त० सा०, पृ० ६१
२. चाति - त० सा०
३. सम्पना - मु०
४. त० सा०, पृ० ६२

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सं० छाया–

सकलप्रकाशरूपा संवेदना स्पन्दतरङ्गकलना तस्याः प्राणः ।
प्राणाभ्यन्तरे परिनिष्ठितः सकलः काल-प्रसरः परिजानीहि ।। १ ।।

यथा उल्लसति यथा अपि निरुध्यति पवनशक्तिः तथा एष महेश्वरः ।।
सृष्टिप्रलयं भासयित्वा निमज्जयति स आत्मानं चित्तत्त्वसागरे ।। २ ।।

एवं प्रक्षीणकालाशङ्काः कालग्रासं करोति। मूर्तिवैचित्र्यकृतोऽपि योऽयं प्रपञ्चः स एव शरीरात्मना घटपटात्मना च वर्तमानो भोक्तृत्वं[१] भोगोपकरणत्वं कुर्वाणं भेदमवभासयन्नद्वैतभावनां प्रतिहन्तीति स्वात्मन्येव संविद्रूपे एकीभावेन भावनीयः। तथा हि ब्रह्माण्डं प्रकृत्यण्डं चासङ्ख्यभेदं तत्कारणं चैकैकरूपम्। मायाण्डं शक्त्यण्डमित्येतानि चत्वार्यण्डानि निःसङ्ख्यैर्भुवनैर्भुवनाधिपतिभिश्च विचित्रैर्व्याप्तानि स्वात्महृदयदर्पणान्तः-प्रतिबिम्बितानि संपश्यंस्तत्रैव च लीनानि संवेदयमानस्त एव चोल्लसितान्यवलोकयन् विश्वात्मतां विश्वोत्तीर्णत्वं विश्वकर्तृत्वं विश्वज्ञातृत्वं विश्वव्यापकत्वं विश्वपूर्णत्वमखण्डितत्त्वं स्वतन्त्रत्वं संविद्रूपत्वं चात्मनो जानात्येव। आह च—

मा० पा०

[२]परमेसरसासणुसुणिरूइउ सुणिविमलअ अद्धाणउ ।
झहुज्झतिससरिपवणि संवेअ णिअ पेक्खन्तउ पहुरइ परिउण्णु ।। ३ ।।

शो० पा०

परमेसरु-सासण-सुणिरूइउ सुणिवि सअल-अद्धाणउ पुण्णु ।
झत्ति सरीरि पवणि संवेअणि पेक्खंतउ पफुरइ परिउण्णु ।। ३ ।।

सं० छाया

परमेश्वरशासनसुनिरूपितः श्रुत्वा सकलाध्वा पुण्यः ।
झटिति शरीरे पवने संवेदने प्रेक्षमाणः प्रस्फुरति परिपूर्णः ।। ३ ।।

।। इति षष्ठमाह्निकम् ।।

---

१. इतः परं 'भोग्यत्वं भोगाधारत्वं' इत्यधिकः पाठः - मु०
२. त० सा०, पृ० ६८

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सप्तममाह्निकम्

तत्र भुवनजातस्य समस्तस्य तत्त्वमात्ररूपत्वं स्वभाव:। तानि च षट्त्रिंशद्वेद्यभूमिपतितानि। संविद्रूपं तु सप्तत्रिंशम्। तदप्युपदेशादौ वेद्यमुपचारेणेति सर्वथा यदवेद्यं स्वतन्त्रं तदष्टत्रिंशम्। तान्येतानि सर्वतत्त्वानि सर्वस्थितानि। तथाहि — देहे यत् कठिनं तद् धरा, यद् द्रवं तदाप:, यदुष्णं तत्तेज:, यत् स्पन्दनं तन्मरुत्, यत् सावकाशं तन्नभ:। तेष्वेव पञ्चसु सुसूक्ष्मरूपत्वादनुद्भिन्नविभागा गन्धरसरूपस्पर्शशब्दतन्मात्राणि तद्ग्राहीणि पञ्चेन्द्रियाणि घ्राणं रसना चक्षु: त्वक् श्रोत्रमिति निजनिजं व्यापारं कुर्वन्ति। पञ्च कर्मेन्द्रियाणि विशिष्टेषु स्थानेषु स्फुटानि। तद्यथा–वाक् पाणि: पायु: उपस्थं जल्पनं ग्रहणं गमनम् उत्सर्गो विसर्ग आनन्देन स्वात्मनि विश्रमणमित्येषामसाधारणव्यापारा:। सङ्कल्पकारि मन:। निश्चयकारिणी विकल्पप्रतिबिम्बधारिणी बुद्धि:। एतावत्यभिमानकार्यहङ्कार:। एषां कारणं गुणा:। तेषामाद्यावस्था साम्यावस्था प्रधानम्। तद्व्यतिरिक्तो भोक्ता पुरुष:। तद्विशिष्ट[1]विषयरंजनको राग:। क्वचिद्विषये योजनिका नियति:। बुद्धिं तत्प्रतिबिम्बितं च वस्तु यया पश्यति साऽस्य विद्या। यया किंचित्करणसमर्थो भवति साऽस्य कला। यो भूतभविष्यद्वर्तमानतया स्वं स्वरूपमाकलयन् भावानपि तथा कलयति सोऽस्य काल:। इयतो वेद्यकलापस्याद्यं कारणं माया। ययाऽस्य पुरुषस्य स्वरूपं प्रकाशयितुं प्रारभ्यते साऽस्य शुद्धविद्या। यस्यामवस्थायां स्फुटानेतानर्थान् स्वात्मन्यभेदेन पश्यति, अहमेते पदार्था इति, साऽस्येश्वरावस्था। यस्यां तु [2]तानेवं स्फुटीभूतान् प्रध्वंसमानानिवाहमेते इत्यभेदेन पश्यति साऽस्य सदाशिवावस्था। यया स्वरूपैकीभूतांस्तानसद्रूपान् संपन्नान् पश्यति साऽस्य शक्त्यवस्थानाश्रितशून्यातिशून्याख्या। यस्यां तु स्वरूपमेव शुद्धं भाति साऽस्य शिवावस्था। यया समग्रमेतद् वैचित्र्यं परामृष्यते साऽस्य पूर्णावस्थेत्येवं षट्त्रिंशत्तत्त्वात्मबत्त्वं प्रसार्य प्रमातृतत्त्वस्य प्रमेयस्यापि तेन सह तादात्म्यापत्तौ प्रमेयत्वादित्येवं विश्वं सर्वं सर्वत: पूर्णं पश्यन्नद्वय एव भाति। स्वशक्त्या च विश्वं भेदयन् एकमपि घटरूपं पदार्थमसङ्ख्यभेदभिन्नं पश्यति। तद्यथा — घटोऽयं मया ज्ञात:, चैत्रेण चक्षुषा ज्ञात:, सोऽहमस्य ज्ञात:, सोऽन्येन

---

१. विषयसक्तिजनको - मु०

२. तानेवास्फु - मु०

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ज्ञातः, एषोऽपि सर्वज्ञैर्ज्ञातः, भगवता परमशिवेन ज्ञातः। एते च वस्तुधर्मा एव तथैवार्थ्यमानत्वाच्चित्रार्थक्रियाकारित्वाच्च। तस्मादात्माधीनं भेदाभेदावभासवैचित्र्यं पश्यन् आत्मानं सर्वोत्तीर्णं सर्वात्मानं च पश्येत् परमेश्वरीभूतम् । अतश्च —

[1]भूम्यादौ तत्त्वजाले नहि भवति वपुस्तादृशं यत्प्रमातुः
संविद्विश्रान्तिवन्ध्यं स्फुरति स बहुधा मातृभावोऽस्य यस्मात् ।
तेनास्मिन् वेद्यजाले क्रमगतकलनां निर्विकल्पामहन्ता-
स्वातन्त्र्यामर्शसारां भुवमधिवसतः प्राप्नुत स्वात्मसत्ताम् ।।

आह च —

मा०पा०

[2]सअलउअद्धजालु निअधअणिपरिमरिमेहहरो ।
चेअणुभरिअभरिउ अप्पहमणिसचिअपाणिमणु ।।१।।

माणसपाणपवण धीसामसुपूरितजजिखणु ।
तं जिघडाइ निहलु परभइरवणाहहुहोइतणु ।।२।।

मत्तिदाणुआवाहणु प्रअणुसण्णिहाणुइउ अहिणअउडु ।
सब्बिह अद्धकलण निर्ब्बाहाराएतिलडेचिअएहइतत्त्व ।।३।।

शो० पा०

सअलउ अद्ध-जालु निअ देअणि परिमरिसेह खणु ।
चेअणु भरिअ-भरिउ अप्पह मणि सो च्चिअ पाणि मणु ।।१।।

माणस-पाण-पवण-वीसास-सुपूरिउ जं जि खणु ।
तं जि घडाइनिहलु(?)पर-भइरव-णाहहु होइ तणु ।।२।।

मंत-दाणु-आवाहणु-आसणु-संनिहाणु इउ अहिणअ-उत्तु।
छब्बिह-अद्ध-कलण-निब्बाहणु एत्तिलहु च्चिअ एहउ तत्तु ।। ३ ।।

सं० छाया

सकलमध्वजालं निज देहे परिमर्शयत क्षणम् ।
चेतनं भृत्वा-भृत्वा आत्ममनसि स एव..... ।।१।।

१. त० सा०, पृ० १०८
२. त० सा०, पृ० ११४

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

मानस-प्राण-पवन-विश्वास-सुपूरितं यदेव क्षणम् ।
तदेव घटते खलु(?) परभैरवनाथस्य भवति तनूः ।।२।।

मन्त्रदानमावाहनमासनं संनिधानमेतदभिनवोक्तम् ।
षड्विधाध्वकलनानिर्वाहः एतावदेव एतत्तत्त्वम् ।।३।।

।। इति सप्तममाह्निकम् ।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अष्टममाह्निकम्

एतावद्यदुक्तं तत् कस्यचित् प्रमातुर्गुरुवचनं विनैव स्वयं प्रकाशते, कस्यचिद् गुरुवचसा। कस्यचित्तु ज्ञानयोग्यत्वं न भवति, तथापि चैवंविधाभ्यस्तज्ज्ञानमहिम्नो गुरोः सकाशाद् दीक्षामासाद्य मुक्तिं लभते। एतावति च परमेश्वरस्यैव स्वातन्त्र्यम्। तथा हि—

[१]यथा निरर्गलो स्वात्मस्वातन्त्र्यात् परमेश्वरः ।
आच्छादयेत् परं धाम तथा विवृणुयादपि ।।

अत एवानपेक्षक एव विचित्रः पारमेश्वरः शक्तिपातः। स्वातन्त्र्यादेव च क्वचित् परमेश्वरो गुरुशास्त्रमन्त्रदीक्षाविषयगर्हाक्रान्तहृदयेऽपि तदनुष्ठानमतिं ददाति, योऽसौ तिरोहित इत्युच्यते। यथाह–

[२]अप्रबुद्धेऽपि वा धाम्नि स्वस्मिन् बुद्धवदाचरेत् ।

सोऽपि च पुनरपि परमेश्वरेणानुगृह्येतापीत्युक्तम् —

भूयो बुद्ध्येत वा सोऽयं शक्तिपातोऽनपेक्षकः ।।

आह च —

मा० पा०

[३]जह निअझ्झउ महेसरु अच्छवि संविरवितह ।
पसरु अत्ति विपर पसरु अच्छ इविमल सरूइ ।।१।।

शो० पा०

जह निअ-रूउ महेसरुअ अच्छइ संवरिवि ।
तह पुणु पअडिवि पर-पसरु अच्छइ विमल-सरूइ ।।१।।

---

१. त० सा०, पृ० १२८
२. " "
३. " "

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सं० छाया

यथा निजरूपं महेश्वरः आस्ते संवृत्य ।
तथा पुनः प्रकटयित्वा पर-प्रसरः आस्ते विमलस्वरूपे ।। १ ।।

एवं यो भगवच्छक्तिपातेन दीक्षाक्रमेण ज्ञानयोग्यः कृतस्तं प्रति दीक्षा वक्तव्या। तत्र चादौ स्नानमुद्दिष्टम् । स्नानं च कालुष्यस्यासंविद्रूपताभिमानस्य यदपासनं तदेव। तदुपयोगि तु यत्किञ्चिज्जलादिक्षालनं तदपि संविन्नैर्मल्यलेशहेतुतया भवतु स्नानम्। तदुपयोगित्वेनैव तत्र विधिः।

आह च —

मा०पा०

[१]परमानन्दनिमज्जणु इउपरमत्थिण ह्लाणु ।
तहिं आविठ्ठतरत्ति दिणु जाणइ पर अप्पाणु ।। २ ।।

शो० पा०

परमानन्द-निमज्जणउ इउ परमत्थिण ह्लाणु ।
तहिं आविठ्ठउ रत्तिदिणु जाणइ परअप्पाणु ।। २ ।।

सं० छाया

परमानन्दनिमज्जनम् इदं परमार्थेन स्नानम् ।
तत्र आविष्टः रात्रिन्दिवं जानाति परमात्मानम् ।। २ ।।

एवं कृतस्नानो यदेव हृदयाह्लाददायि तदेव यागस्थानं गच्छेत् । तत्र स्थण्डिले [२]मण्डले स्वशक्तिगुरुदेहचक्रप्राणान्तरात्मसु वा उक्तातिविस्तरपूर्णत्वोत्तीर्णत्वसंविद्रूपत्वतादात्म्य-भावनात्मकानुत्तरसंस्कारसंस्कृतेषु देवताचक्रं वक्ष्यमाणविधिनाऽर्चयेत्। तत्र शक्तित्रयात्मा योऽसौ परमशिवः सप्तत्रिंशो भैरवस्तमप्युल्लङ्घ्य तमासनपक्षीकृत्याष्टात्रिंशत्तमीयाऽसौ भगवती परसंविदुक्ता सैव चण्डयोगीश्वर्यात्मिका विश्वग्राससृष्टिचक्रवाहिनी द्वाद[३]शभिर्मरीचिरूपाभिर्देवताभिः सह केवला वा विश्वा-विभेदवृत्त्या पूज्या। पूजाविधिस्त्वयं गुरुवचनगम्यो योगिनीहृदयवक्त्रारूढः ।

---

१. त० सा०, पृ० १३२
२. मण्डले वा - ख
३. द्वादशोर्मिर्म - ख

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

[४]शक्तिस्तद्वदभिन्ना कार्यसहोद्भूतिरूपा सा ।
अन्योन्योचितपूजा-पूज्यानन्दान्तिकत्वलाभफलम् ।।१।।

निजनिजभोगाभोगप्रविकासमयस्वरूपपरिमर्शे ।
क्रमशोऽनुचक्रचर्यांशिचच्चक्रेशं च मध्यमं यान्ति ।।२।।

अनुचक्रदेवतात्मकमरीचिसंपूर्णवीर्यमथ युगलम् ।
उच्छलदुन्मुखमनुचक्रमैक्यं समुच्छालयेत् ।।३।।

इत्थं युगलकमेतद् गलितभिदासंकथं यदा तदैव ।
ध्रुवधामानुत्तरचिद्विसर्गसंघट्ट एष परः ।।४।।

शान्तोदितविसर्गद्वयमस्मात् सूयतेऽत्र ये द्वितये ।
अनुसंदधति प्राच्यां सत्तां चैतेऽनवच्छिन्नाः ।।५।।

एतत् त्रिविसर्गान्तः विसर्गवीर्योपवृंहिते मन्त्रे ।
तदिदं वक्त्रे कृत्वा तत्तृप्त्या सिद्धिमुक्तिदं चक्रम् ।।६।।

मध्यस्थनालगुम्फितसरोजयुगघट्टनक्रमादग्नौ ।
मध्यस्थ पूर्णशशधरसुन्दरदिनकरकलौघसंघट्टात् ।।७।।

सृष्ट्यादिक्रममन्तःकुर्वंस्तुर्ये स्थितिं लभते ।
एतत् खेचरमुद्रावेशोऽन्योन्यं च शक्तिशक्तिमतोः ।।८।।

अव्यक्तध्वनिरावस्फोटाकृतिनादनादान्तैः ।
अव्युच्छिन्नानाहतपरमार्थैर्मन्त्रबीजं तत् ।।९।।

त्यक्ताशङ्को निराचारो नाहमस्मीति भावयन् ।
कर्णाक्षिमुखनासादिचक्रस्थं देवतागणम् ।।१।।

अन्तःस्थं देवताचक्रं ह्लादोद्वेगादि चिद्घने ।
गृहीतारं सदा पश्यन् खेचर्या सिद्ध्यति ध्रुवम् ।।२।।

आर्यानवकश्लोकद्वितयार्थं शम्भुनाथमुखकमला-
दाप्तं समामनन्तः सद्यः स्युर्भैरवा एव ।।१।।

४. तन्त्रसारे पृष्ठ २०१ तः २०५ यावत् ३६ कारिकाणां संक्षेपरूपं, नवकारिकाः श्लोकद्वयं च।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

एवमानन्दकार्यकारणैरेव परमेश्वरी सर्वाविभागमयी पूज्या। शक्त्यारूढेन च जप्तव्यम्। अनन्तरं च शिष्यं प्रवेश्य —

अध्वानमालोच्य समस्तमन्तः-
पूर्णं स्वमात्मानमथावलोक्य ।
पश्येदनुग्राह्यधिया द्विषट्क-
पर्यन्तमेवं समयी शिशुः स्यात् ।।

मा० पा०

[1]सअलभा अपरि उण्णउ परभैरउ अत्ताणु ।
जाइवि अग्गणि सण्णउ जोअभिमी सत्ताणु ।।३।।

एहस समयदिक्ख परभइरव जलणि हि मज्जणिण ।
इत्थति लज्जहवन बहुपभवहोइउवाउजिण ।।४।।

शो० पा०

सअल-भाव-परिउण्णउ परभइरउ अत्ताणु ।
जाइवि अग्गणिसण्णउ जोअभि सीसत्ताणु ।।३।।

एह स-समय-दिक्ख पर-भइरव जलणिहि-मज्जणिण ।
इत्थ तिलज्जहवन वहु-परिभव होइ उवाउ जिण ।।४।।

सं० छाया

सकलभावपरिपूर्णः परभैरव आत्मा ।
.... अग्रनिषण्णः ....।।३।।

एषा स्वसमयदीक्षा परभैरवजलनिधिमज्जनेन ।
अत्र तिलाज्यहोमे बहु परिभवः भवति उपाय एव न ।।४।।

समयश्चास्य देवगुरुशास्त्रोपासनादयः स्वयमेव हृदये स्फुरेयुः, वितताश्च विततादवलोक्याः। इत्येषा तन्मन्त्रदेवतासंपत्तिप्रदा समयदीक्षा। पुत्रकदीक्षा तु देहान्तेऽपवर्गप्रदायिनी। तत्र विधिः —

---

१. त० सा० पृ० १५५

२. त० सा० पृ० १६०

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अन्तः समस्ताध्वमयीं स्वसत्तां बहिश्च संधाय विभेदशून्यः ।
शिष्यस्य धीप्राणतत्त्वं निजासु तास्वेकतां संगमयेत् प्रबुद्धः ।।

शिष्यैकभावं झटिति प्रपद्य तस्मिन् महानन्दविबोधपूर्णे ।
यावत् स विश्राम्यति तावदेव शिवात्मभावं पशुरभ्युपैति ।।

आह च —

मा० पा०

[१]जे महु एकीभाउलये विणुअच्छइ एहु विबोह समुद्द ।
सो पशु भइरवु हो इलये विणु अन्तर्नाविजिउ अस असमुद्द ।।

शो० पा०

जे सहु एक्कीभाउ लएविणु अच्छइ एहु विबोह-समुद्दि ।
सो पसु भइरवु होइ लएविणु अत्ताणउ जिउ अमअ-समुद्दि ।।

सं० छाया

येन सह एकीभावं प्राप्य आस्ते एष विबोध-समुद्रे ।
सः पशुः भैरवः भवति प्राप्य आत्मानं यथा अमृत-समुद्रे ।।

आसन्नमृत्योरपि शक्तिपातादेवमेव दीक्षां कुर्यात्।

आह च —

मा० पा०

[१]जं अनु सन्धि विसेसं घेतूण जडन्ति मन्तमुच्चरइ ।
इच्छासत्तिप्पाणो तं तं मंतो करेइ फुडं ।।

शो० पा०

जं अणुसंधि-विसेसं घेत्तूण झडत्ति मंतमुच्चरइ ।
इच्छा-सत्ति-प्पाणो तं तं मंतो करेइ फुडं ।।

सं० छाया

यमनुसन्धिविशेषं गृहीत्वा झटिति मन्त्रमुच्चरति ।
इच्छा-शक्ति-प्राणः तं तं मन्त्रः करोति स्फुटम् ।।

---

१. त० सा०, पृ० १६५

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अत एव परोक्षस्य जीवतोऽप्यनुसन्धिबलादेव दीक्षां कुर्यात्, मृतस्य तु जालप्रयोगक्रमेण। तद्विधि: —

[१]मूलाधारादुदेत्य प्रसृतसुविततानन्तनाड्यध्ववदण्डं
वीर्येणाक्रम्य नासागगनपरिगतं विक्षिपन् व्याप्तुमीष्टे।
यावद्धूमाभिरामप्रचिततरशिखाजालकेनाध्वचक्रं
संछाद्याभीष्टजीवानयनमिति महाजालनामा प्रयोग: ।।

ये ऽप्यधरशासनस्था उत्तमशासनानुष्ठानं चाधमशासनस्थाद् गृहीतवन्तस्ते यदा सम्यक्शक्तिपातबलात् सद्गुरुमुपासते तदा तेषां पूर्वव्रताद्यपास्य समयित्वे पुत्रकत्वे वा प्राग्वदेव योजनमिति लिङ्गोद्धारदीक्षा। यस्तु स्वभ्यस्तज्ञान: स चेत् स्वात्मन: सिद्धिं वाञ्छति तत्साधकत्वेऽभिषेक्तव्य:, न चेत् परार्थसंपादनातिरिक्तकर्तव्यताभावादाचार्यत्वे नियोक्तव्य:। तत्र सर्वार्पणविश्वाध्वपूर्णमन्त्रदेवतासंविद्रसपूर्णकलशाभिषेक:। इहैतज्ज्ञानानुग्रहीतानामन्त्येष्टिश्राद्धादिकं नोपयुज्यत इति, तन्मरणदिनं परं तन्सन्तानिनां पर्वदिनमिति। तत्र विशेषत: पूजा चक्रतर्पणं च यथाविभवमविकल्प्यम्। एवं परमेश्वरेच्छैव मोचिकेति तदधिष्ठित आचार्य:। शक्तिपाताधिष्ठिते तत एव निर्विचिकित्सारूढिभाजने शिष्य एवं प्रकारैरभीष्टसिद्धिं वितरेत्। यत: —

[२]अनुग्रहपर: शिवो वशितयाऽनुगृह्णाति यं
स एव परमेश्वरीभवति तत्र किंवाद्भुतम् ।
उपायपरिकल्पना ननु तदीशनामात्रकं
विदन्निति न शङ्कते परिमितोऽप्युपाये बुध: ।।

आह च—

मा० पा०

[३]एहु सरीरु सअलु अह भवसरु इच्छामित्तणजेण विचित्ति उ ।
सोच्चिअ सोक्खदेयि परमेसरु इअजानन्त उरूढिपवित्ति उ ।।

---

१. त० सा०, पृ० १६७

२. त० सा०, पृ० १७७

३. त० सा०, पृ० १७७

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

शो॰पा॰

एहु सरीरु सअलु अह भवसरु इच्छा-मित्तिण जेण वि चित्तिउ ।
सो च्चिअ सोक्खु देइ परमेसरु इअ जाणंतउ रूढि-पवित्तिउ ।।

सं॰ छाया

एतत् शरीरं सकलम् अथ भवसरः इच्छामात्रेण येन अपि चिन्तितम् ।
स एव सौख्यं ददाति परमेश्वरः इति जानन् रूढि-पवित्रितः ।।

।। इत्यष्टममाह्निकम् ।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नवममाह्निकम्

लब्धदीक्षाको ज्ञातसिद्ध्यपवर्गरूढिलाभनिमित्तं नित्यं नैमित्तिकं चोपासीत। स्वभ्यस्तज्ञानोऽपि, ज्ञानाभ्यासतारतम्याय तत्रास्य परार्थम्, स्वयं तु दृढप्रतिपत्तिमात्रेणैव कृतार्थत्वात्। तत्र नित्यं सन्ध्योपासनपूजनजपस्वाध्यायगुरुसेवादिकम्, नैमित्तिकं तु पर्वपूजादिकं पवित्रकादिविधिश्च। नैमित्तिके मुख्यः कल्पः शाक्तमर्घपात्रं प्रतिवर्षं जन्म मध्येऽपि वा चर्यापूरणाय। अपूर्णचर्या मोक्षे विघ्नः। तत्र पर्वदिनानि — प्रतिमासं प्रथमपञ्चमदिने, विषुवति, चैत्रशुक्लत्रयोदशी दिनमध्यम्, विशेषतस्तु बुधपूर्वफल्गुनीयोगः, वैशाखकृष्णाष्टमी दिनमध्यं बुधश्रवणयोगः, ज्येष्टकृष्णनवमी, मध्यन्दिनं चन्द्रशतभिषग्योगः, आषाढकृष्णप्रतिपन्मध्यन्दिनमादित्यमूलयोगः, श्रावणकृष्णैकादशी पूर्वाह्णः शुक्ररोहिणीयोगः, भाद्रपदशुक्लषष्ठी दिनमध्यं बृहस्पतिविशाखायोगः, आश्वयुक्शुक्लनवमीदिनं सर्वं नात्रयोगः, कार्तिकशुक्लनवम्यां रात्रेः प्रथमो भागः आदित्योत्तरफल्गुनीयोगः, पौषकृष्णनवम्यां रात्रिमध्यं चन्द्रचित्रायोगः, माघशुक्लपञ्चदश्यां रात्रिमध्यं बृहस्पतिमघायोगः, फाल्गुनशुक्लद्वादश्यां मध्यन्दिनं चन्द्रतिष्ययोगः। अग्रतिथिवेधस्त्वत्र विशेषतरः। त्रिधा दिनं रात्रिं च कृत्वा पूर्वमध्यापरभागो यागकालः। योगसहिते विशेषतः पूजाचक्रयागतर्पणम्। भागशो विशेषसम्भवे भागभागपूजायागयजनं भवति। योगलाभे वेलाया असम्भवे योगो बलीयान्। अनुयागकाललाभश्च मुख्य इत्येवं पर्वविधिः।

अन्यान्यपि नैमित्तिकानि। यथा– गुरोर्गृहागमनं तद्वर्ग्यस्य च, शास्त्रज्ञानलाभो। देवतादर्शनादिश्चेति।

अथ पवित्रकविधिः। स च [1]विधिः पूरकश्चेति अवश्यमेव कर्तव्यः। स चाषाढशुक्लात् कार्तिकान्तं कर्तव्यः। माघान्ते दक्षिणायनेऽपि वा क्वचिदुक्तः। तद्विधिस्तु यथासम्भवं सौवर्णपट्टसूत्रपवित्रकादारभ्य दार्भमपि पवित्रकं वित्तशाठ्यपरिहारेणाध्वसंख्यक-ग्रन्थिकं सर्वाध्वपरिपूर्णं भावयित्वा गुरुरर्पयेच्छिष्यार्थे। ततो विशेषपूजनतर्पणदक्षिणादीन्येवं नित्यनैमित्तिकं कुर्वाणस्याविलुप्तोत्साहस्य विनापि प्रमुखज्ञानयोगाचारया चर्यामात्रान्मुक्तिः। आह च —

१. विधिपूरकः परमेश्वराज्ञापूरकश्चेति - मु०

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

मा० पा०

[१]सिवणाहु सच्छन्दु तत्त्वकोणविअप्प इच्छ ।
चरि आमित्ति णजिणजण हुकिअ भवरोअ चिइच्छ ।।१।।

शो० पा०

सिव-णाउ सच्छंदु उहु(?) को णवि अप्प इच्छ(?) ।
चरिआ-मित्तिण जिण जणहु किअ भव-रोअ-चिइच्छ ।।१।।

सं० छाया–

शिवनादः स्वच्छन्दः पश्यत(?) कः, नापि अल्पा इच्छा ।
चर्यामात्रेण येन जनस्य कृता भवरोगचिकित्सा ।।१।।

।। इति नवममाह्निकम् ।।

२. त० सा०, पृ० १९२

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

दशममाह्निकम्

इत्येवं गुरुवचनादधिगम्य सर्वथा गुरुर्भगवान् पूजनीयः। तत्र सुवर्णपूर्ण-पृथिवीदानेनापि न गुरावनृणीभवति, इत्युक्तं तत्र तत्र श्रुत्यन्तसिद्धान्ततन्त्रोत्तीर्णादिषु, किन्तु सबाह्याभ्यन्तरमात्मपर्यन्तमर्पणं कृत्वा तत्रानृणीभवति। यावच्च गुरावनृणी न सम्पन्नस्तावदधिकारबन्धोऽस्य न निवर्तते। तस्मात् सर्वथा दान्तेन वित्तशाठ्यविरहितेन सर्वस्वकलत्रात्मनिवेदनान्ततया गुरुः पूज्यो वन्द्यः परितोष्यः।

येन येन प्रकारेण गुरुः सन्तोषमेत्यसौ ।
[कार्यःप्र]कारस्तेनासौ प्रसीदेद्देवतागणः ।।इति।।

प्रकारादौ तदिदमुक्तं वक्तव्यं यत् सर्वोत्तीर्णशास्त्राणां साररहस्यभूतमभिधेयम् ।

अहमभिनवगुप्तः प्रार्थये सद्विवेकान्
प्रणयिवचनभङ्गं तेऽपि नालं विदध्युः ।
किमपि किमपि यद्वत्सारमालोकयध्वं
परमिदमपि तद्वद् [वस्तु]भं वेत्थ पश्चात् ।।

[इतः परं मुद्रितग्रन्थे निम्नांकितः पाठोऽधिकः प्रदत्तः। वस्तुतः तन्त्रसारस्याय-मुपसंहारांशो न तु. तन्त्रोच्चयस्य। तत्रत्योऽपभ्रंशोंशस्तु मुद्रिते न लिखितः तन्त्रसारादत्रोद्ध्रियते।]

[१]संवित्प्रकाशपरमार्थतया यथैव भात्यामृशत्यपि तथेति विवेचयन्तः ।
सन्तः समस्तमथचित्प्रतिभाविमर्शसारं समाश्रयत शास्त्रमनुत्तरात्म ।।

आह च —

मा० पा०

[२]जिस्स दढपसिद्धिघडिए ववहारे सोइ अस्मि णीसंको ।
तह होहि जहुत्तिण पसिद्धिरूढिए परमसिवो ।।

१. त० सा०, पृ० १९७
२. त० सा०, पृ० १९७

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

शो० पा०

जस्स दढ-पसिद्धि-घडिए ववहारे लोउ अत्थि णीसंको ।
तह होइ जणुत्तिण-प्पसिद्धि-रूढिए परमसिवो ।।

सं० छाया–

यस्य दृढप्रसिद्धिघटिते व्यवहारे लोकः अस्ति निःशङ्कः ।
तथा भवति जनोत्तीर्णप्रसिद्धिरूढ्या परमशिवः ।।

[श्री शम्भुप्रोक्तानि षडर्ध] तन्त्रराद्धान्त शास्त्राण्यधिगम्य सम्यक् ।
श्रीशम्भुपादाब्जनिषेवणेन नियुक्तचित्तोऽभिनवप्रधानः ।।

चित्रा + + + + + + + + + + + ।
आलोकसारद्वयभिन्नमेतत् तन्त्रं त्रिधा व्याकुरुतेऽस्म गुप्तम् (प्तः) ।।

।। इति तन्त्रोच्चये दशममाह्निकम् ।।

।। समाप्तोऽयं ग्रन्थः ।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

देहस्थदेवताचक्रस्तोत्रम्

देहो देवालयः प्रोक्तः स्वात्मा देवः सनातनः ।
त्यजेदज्ञाननिर्माल्यं सोऽहंभावेन पूजयेत् ।।१।।

ॐ असुरसुरवृन्दवन्दितमभिमतवरवितरणे निरतम् ।
दर्शनशताग्र्यपूज्यं प्राणतनुं गणपतिं वन्दे ।।१।।

वरवीरयोगिनीगणसिद्धावलिपूजिताङ्घ्रियुगलम् ।
अपहृतविनायिजनार्तिं वटुकमपानाभिधं वन्दे ।।२।।

यद्धीबलेन विश्वं भक्तानां शिवपथं भाति ।
तमहमवधानरूपं सद्गुरुममलं सदा वन्दे ।।३।।

आत्मीयविषयभोगैरिन्द्रियदेव्यः सदा हृदम्भोजे ।
अभिपूजयन्ति यं तं चिन्मयमानन्दभैरवं वन्दे ।।४।।

उदयावभासचर्वणलीलां विश्वस्य या करोत्यनिशम् ।
आनन्दभैरवीं तां विमर्शरूपामहं वन्दे ।।५।।

अर्चयति भैरवं या निश्चयकुसुमैः सुरेशपत्रस्था ।
प्रणमामि बुद्धिरूपां ब्रह्माणीं तामहं सततम्[1] ।।६।।

कुरुते भैरवपूजामनलदलस्थाभिमानकुसुमैर्या ।
नित्यमहङ्कृतिरूपां वन्दे तां शाङ्करीमम्बाम् ।।७।।

विदधाति भैरवार्चां दक्षिणदलगा विशेष[2]कुसुमैर्या ।
नित्यं मनःस्वरूपां कौमारीं तामहं वन्दे ।।८।।

नैर्ऋतदलगा भैरवमर्चयते शब्दकुसुमैर्या ।
प्रणमामि [3]श्रुतिरूपां नित्यां तां वैष्णवीं शक्तिम् ।।९।।

पश्चिमदिग्दलसंस्था हृदयहरैः स्पर्शकुसुमैर्या ।
तोषयति भैरवं तां त्वग्रूपधरां नमामि वाराहीम् ।।१०।।

---

१. वन्दे–पा०। २. विकल्प–पा०। ३. शब्द–पा०।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

वरतररूपविशेषैर्मारुतदिग्दलनिषण्णदेहा या ।
पूजयति भैरवं तामिन्द्राणीं दृक्तनुं वन्दे ।।११।।

धनपतिकिसलयनिलया या नित्यं विविधषड्रसाहारैः ।
पूजयति भैरवं तां जिह्वाभिख्यां नमामि चामुण्डाम् ।।१२।।

ईशदलस्था भैरवमर्चयते परिमलैर्विचित्रैर्या ।
प्रणमामि सर्वदा तां घ्राणाभिख्यां महालक्ष्मीम् ।।१३।।

षड्दर्शनेषु पूज्यं षट्त्रिंशत्तत्त्वसंवलितम् ।
आत्माभिख्यं सततं क्षेत्रपतिं सिद्धिदं नौमि[1] ।।१४।।

संस्फुरदनुभवसारं सर्वान्तःसततसन्निहितम् ।
नौमि सदोदितमित्थं निजदेहगदेवताचक्रम् ।।१५।।

।। इति देहस्थदेवताचक्रस्तोत्रम् ।।

---

१. वन्दे–पा०।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

पञ्चश्लोकी

ॐ तत्सत्

यत्सत्यं तु मया कृतं मम विभो कृत्यं तु नातः परं
यन्मन्मानसमैशपादकमले भक्त्या मयैवार्पितम् ।
सर्वस्वमत एवमेतदितरन्नास्त्येव जानाम्यत -
स्त्यक्त्वा क्षिप्रमनाथनाथ करुणासिन्धो प्रसन्नो भव ।।१।।

महेश त्वद्द्वारि स्फुरतु रुचिरा वागतितरां
ममैषा निर्दोषं जय जय महेशेति सततम् ।
शिवा सैषा वाणी भवतु शिवदा मह्यमनिशं
महेशानाथं मां शरणद सनाथं कुरु विभो ।।२।।

ब्रूषे नोत्तरमङ्ग पश्यसि न मामेतादृशं दुःखितं
विज्ञप्तिं बहुधा कृतां न शृणुषे नायासि मन्मानसे ।
संसारार्णवगर्तमध्यपतितं प्रायेण नालम्बसे
वाक्चक्षुःश्रवणाङ्घ्रिपाणिरहितं त्वामाह सत्यं श्रुतिः ।।३।।

गुरोर्वाक्याद् युक्तिप्रचयरचनोन्मार्जनवशात्
समाश्वासाच्छास्त्रं प्रति समुचिताद्वापि कथितम् ।
विलीने शङ्काभ्रे हृदयगगनोद्भासि महसः
प्रभोः सूर्यस्येव स्पृशतु चरणान् ध्वान्तजयिनः ।।४।।

यातस्त्वत्सहवासतो बहुतरः कालो वतास्मिन् क्षणे
किं किं वा न कृतं त्वया वरगुरूपासानिमित्तेन मे ।
वारं वारमहं पुनर्निरुपमां दिव्यं भुवं प्रासुव –
त्कायस्त्वां किल विस्मरामि यदतः स्थेयं न भूयस्त्वया ।।५।।

अभिनवगुप्तपादानाम्

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

परमाद्वयद्वादशिका

तथ्यातथ्यमकल्पमल्पशयनैर्जल्पक्रमं संहरं –
स्तत्संहारक्रमे न किं कथमिदं [१]कोऽस्मीति माचीक्लृपः ।
भावाभावविभागभासकतया यद्भात्यभग्नक्रमं
तच्छून्यं शिवधाम वस्तुपरमं ब्रह्मात्र कोऽर्थग्रहः ।।१।।

यद्यतत्त्वपरिहारपूर्वकं तत्त्वमेषि यदतत्त्वमेव हि ।
यद्यतत्त्वमथ तत्त्वमेव वा तत्त्वमेव ननु तत्त्वमीदृशम् ।।२।।

यद्यद्भाति न भानतः पृथगिदं भेदोऽपि भातीति चेद्
भाने सोऽपि न भाति किं जहि ततस्तद्भङ्गिभङ्गग्रहम् ।
स्वप्ने स्वप्नतया प्रथां गतवति क्रीडैव नो भीतिकृत्
शस्त्राघात-जलावपात-हुतभुङ्निर्घात-बन्धादिकम् ।।३।।

ध्यानक्रियाकलनपूर्वकमध्यवस्येद्-
यद्यद्भवान् कथय कोऽस्य जडाद्विशेषः ।
स्फूर्जज्जडोऽपि न किमद्वयबोधधाम
निस्सीमनित्यनिरवग्रहसत्यरूपम् ।।४।।

भावानामवभासकोऽसि यदि [२]तैर्मालिन्यमातन्यते
किं ते तद्यदि भाति हन्त भवतस्तत्राप्यखण्डं महः ।
नो चेन्नास्ति तदेवमप्युभयथा निर्व्याजनिर्यन्त्रणा
त्रुट्यद्विभ्रमनित्यतृप्तिमहिमा नित्यप्रबुद्धोऽसि भोः ।।५।।

दृष्टिं बहिः प्रहिणु [३]लक्ष्यमथान्तरित्थं
स्याद्भैरवानुकरणं वत वञ्चनेयम् ।
निर्द्वन्द्वबोधगगनस्य न बाह्यमस्ति
नाभ्यन्तरं निरवकाशविकासधाम्नः ।।६।।

---

१. कोऽसी–पा० ।

२. तैर्मोहः कि–पा० ।

३. पथातिरिक्तं–पा० ।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

वासनाप्रसरविभ्रमोदये यद्यदुल्लसति तत्तदीक्ष्यताम् ।
आदिमध्यनिधनेषु तत्र चेद्भासि भासि तव लीयतेऽखिलम्[१] ।।७।।

मोहो [२]दुःखवितर्कतर्कणघनो हेतुप्रथानन्तर -
प्रोद्यद्विभ्रमशृङ्खलातिवहलो गन्धर्वपूस्सन्निभः ।
द्वैताद्वैतविकल्पनाश्रयपदे चिद्व्योम्नि नाभाति चेत्
कुत्रान्यत्र चकास्तु कास्तु परमा निष्ठाप्यनेकात्मना ।।८।।

स्वप्ने तावदसत्यमेव मरणं सौषुप्तधाम्निप्रथा
नैवास्यास्ति तदुत्तरे निरुपधौ चिद्व्योम्नि कोऽस्य ग्रहः ।
जाग्रत्येव [३]घटावभासवदथ स्याच्चेत्क्षणे कुत्रचि-
[४]दारोप्यापि तदत्यये पृथगिदं तत्रापि का खण्डना ।।९।।

ये ये केऽपि प्रकाशा मयि सति परमव्योम्नि लब्धावकाशाः
[५]क्वाशामेतेषु यद्ये महिमनि मयि मोः निर्विभागं विभान्ति ।
सोहं निर्व्याजनित्यप्रतिहतकलनानन्तसत्यस्वतन्त्र-
ध्वस्तद्वैताद्वयादि द्वयमयतिमिरापारबोधप्रकाशः ।।१०।।

कालः संकलयन् कलाः कलयतु स्रष्टा सृजत्वादराद्-
आज्ञायाः परतन्त्रतामुपगतो मथ्नातु वा मन्मथः ।
क्रीडाडम्बरमम्बराश्रयमिव स्वे लेखरेखाक्रमं
देहाद्याश्रयमस्तु वैकृतिमहामोहो न पश्यामि किम् ।।११।।

कः कोऽत्र भोऽहं कवलीकरोमि
कः कोऽत्र भोऽहं सहसानिडन्मि ।
कः कोऽत्र भोऽहं परबोधधाम
सञ्चर्वणोन्मत्ततनुः पिबामि ।।१२।।

---

१. जगत्–पा०।

२. त्तत्खल–पा०।

३. धरावदर्थनिचयः–पा०।

४. ज्ञानेनाथ–पा०।

५. काशाह्ये–पा०।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

भवोत्थभयभङ्गदं गदश्रृगालविद्रावणं
प्रबोधधुरिधीमतामपि सकृद्यदुद्दीपयन् ।
स्वधामगहनाटवीविहरणातितृप्त्युद्गमाद् -
विभेदहरिवृंहितं व्यधित रम्यदेवो हरः ।।१३।।

।। इति परमाद्वयद्वादशिका ऽभिनवगुप्तपादविरचिता समाप्ता ।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

बिम्बप्रतिबिम्बवादः

ॐ नमः श्रीगुरवे ॐ

प्रकाशमात्रं यत्प्रोक्तं भैरवीयं परं महः ।
तत्र स्वतन्त्रतामात्रमधिकं प्रविविच्यते ।।१।।

यः प्रकाशः स विश्वस्य प्रकाशत्वं प्रयच्छति ।
न च तद्व्यतिरेक्यस्ति विश्वं सद्वाऽवभासते ।।२।।

अतोऽसौ परमेशानः स्वात्मव्योमन्यनर्गलः ।
इयतः सृष्टिसंहाराडम्बरस्य प्रवर्तकः ।।३।।

निर्मले मुकुरे यद्वद्भान्ति भूमिजलादयः ।
अमिश्रास्तद्वदेकस्मिंश्चिन्नाथे विश्ववृत्तयः ।।४।।

सदृशं भाति नयनदर्पणाम्बरवारिषु ।
तथाहि निर्मले रूपे रूपमेवावभासते ।।५।।

प्रच्छन्नरागिणीकान्तप्रतिबिम्बितसुन्दरम् ।
दर्पणं कुचकुम्भाभ्यां स्पृशन्नपि न तृप्यति ।।६।।

न हि स्पर्शोऽस्यं विमलो रूपमेव तथा यतः ।
वैमल्यं चातिनिविडमजातीयैकसङ्गतिः ।।७।।

स्वस्मिन्नभेदाद्भिन्नस्य दर्शनक्षमतैव या ।
अत्यक्तस्वप्रकाशस्य नैर्मल्यं तद्गुरूदितम् ।।८।।

नैर्मल्यं मुख्यमेतस्य संविन्नाथस्य सर्वतः ।
अंशांशिकातः क्वाप्यन्यद्विमलं तत्तदिच्छया ।।९।।

भावानां यत्प्रतीघाति वपुर्मायात्मकं हि तत् ।
तेषामेवास्ति सद्विद्यामयं त्वप्रतिघातकम् ।।१०।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तदेवमुभयाकारमवभासं प्रकाशयन् ।
विभाति वरदो बिम्बप्रतिबिम्बतया[1]ऽखिले ।।११।।

यस्याहं नेत्रतेजांसि स्वच्छात्प्रतिफलन्त्यलम् ।
विपर्यस्य स्वकं वक्त्रं गृह्णन्तीति स पृच्छ्यते ।।१२।।

देहादन्यत्र यत्तेजस्तदधिष्ठातुरात्मनः ।
तेनैव तेजसा ज्ञत्वे कोर्थः स्याद्दर्पणेन तु ।।१३।।

विपर्यस्तैस्तु तेजोभिर्ग्राहकात्मत्वमागतैः ।
रूपं दृश्येत वदने निजे न मुकुरान्तरे ।।१४।।

स्वमुखे स्पर्शवच्चैतद्रूपं भायान्ममेत्यलम् ।
न त्वस्य स्पृश्यभिन्नस्य वेद्यैकान्तस्वरूपिणः ।।१५।।

रूपसंस्थानमात्रं तत् स्पर्शगन्धरसादिभिः ।
न्यग्भूतैरेव तद्युक्तं वस्तु तत्प्रतिबिम्बितम् ।।१६।।

न्यग्भावो ग्राह्यताभावात् तद्भावोऽप्रमाणतः ।
स चार्थसङ्गमाभावात् सोऽप्यादर्शेऽनवस्थितेः ।।१७।।

अत एव गुरुत्वादिधर्मो नैतस्य भासते[2] ।
नह्यादर्शे संस्थितोऽसौ तद्दृष्टौ स उपायकः ।।१८।।

तस्मात्तु नैष भेदेन यद् भाति तत उच्यते ।
आधारस्तत्र रूपाया दीपदृक्संविदः क्रमात् ।।१९।।

दीपचक्षुर्विबोधानां काठिन्याभावतः परम् ।
सर्वतश्चापि नैर्मल्यान्न विभादर्शवत्पृथक् ।।२०।।

एतच्च देवदेवेन दर्शितं बोधवृद्धये ।
मूढानां वस्तु भवति ततोऽप्यन्यत्र नाप्यलम् ।।२१।।

प्रतीघाति स्वतन्त्रं नो न स्थाय्यस्थायि चापि न ।
स्वच्छस्यैवैथ कस्यापि महिमेति कृपालुना ।।२२।।

---

१. दृशा–पा०।

२. लक्ष्यते–पा०।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

न देशो नो रूपं न च समययोगो न परिमा
न चान्योन्यासङ्गो न च तदपहानिर्न घटना[१] ।
न चावस्तुत्वं स्यान्न च किमपि सारं निजमिति
ध्रुवं मोहः शाम्येदिति निरदिशद्दर्पणविधिम् ।। २३ ।।

।। इति बिम्बप्रतिबिम्बवादः ।।

१. घनता–पा०।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

बोधपञ्चदशिका

अनस्तमितभारूपस्तेजसां तमसामपि ।
य एकोऽन्तर्यदन्तश्च तेजांसि च तमांसि च ।।१।।

स एव सर्वभावानां स्वभावः परमेश्वरः ।
भावजातं हि तस्यैव शक्तिर्येश्वरतामयी ।।२।।

शक्तिश्च शक्तिमद्रूपाद् व्यतिरेकं न वाञ्छति ।
तादात्म्यमनयोर्नित्यं वह्निदाहतयोरिव ।।३।।

स एव भैरवो देवो जगद्भरणलक्षणः ।
स्वात्मादर्शे समग्रं हि यच्छक्त्या प्रतिबिम्बितम् ।।४।।

तस्यैवैषा परा देवी स्वरूपामर्शनोत्सुका ।
पूर्णत्वं सर्वभावेषु यस्या नाल्पं न चाधिकम् ।।५।।

एष देवोऽनया देव्या नित्यं क्रीडारसोत्सुकः ।
विचित्रान् सृष्टिसंहारान् विधत्ते युगपत्प्रभुः ।।६।।

अतिदुर्घटकारित्वमस्यानुत्तरमेव यत् ।
एतदेव स्वतन्त्रत्वमैश्वर्यं बोधरूपता ।।७।।

परिच्छिन्नप्रकाशत्वं जडस्य किल लक्षणम् ।
जडाद्विलक्षणो बोधो यत्तेन परिमीयते ।।८।।

एवमस्य स्वतन्त्रस्य निजशक्त्युपभोगिनः ।
स्वात्मगाः सृष्टिसंहाराः स्वरूपत्वेन संस्थिताः ।।९।।

तेषु वैचित्र्यमत्यन्तमुच्चाधस्तिर्यगेव यत् ।
भुवनानि तदीशाश्च सुखदुःखमितिर्भवः ।।१०।।

यदेतस्यापरिज्ञानं तत्स्वातन्त्र्यं हि वर्णितम् ।
स एव खलु संसारे जडानां यो (या) विभीषिका ।।११।।

तत्प्रसादवशादेव गुर्वागमत एव वा ।
शास्त्राद्वा परमेशस्य यस्मात्कस्मादुपायतः ।।१२।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

यत्तत् तस्य परिज्ञानं स मोक्षः परमेशता ।
तत्पूर्णत्वं प्रबुद्धानां जीवन्मुक्तिश्च सा स्मृता ।।१३।।

एतौ बन्धविमोक्षौ च परमेशस्वरूपतः ।
न भिद्येते न भेदो हि तत्त्वतः परमेश्वरे ।।१४।।

इत्थमिच्छाकलाज्ञानशक्तिशूलाम्बुजाश्रितः ।
भैरवः सर्वभावानां स्वभावः परिशील्यते ।।१५।।

मुक्तभारमतीन् शिष्यान् प्रबोधयितुमञ्जसा ।
इमेऽभिनवगुप्तेन श्लोकाः पञ्चदशेरिताः ।।१६।।

।। इति बोधपञ्चदशिका ।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

भैरवस्तोत्रम्

ॐव्याप्तचराचरभावविशेषं चिन्मयमेकमनन्तमनादिम् ।
भैरवनाथमनाथशरण्यं त्वन्मयचित्ततया हृदि वन्दे ।।१।।

त्वन्मयमेतदशेषमिदानीं भाति मम त्वदनुग्रहशक्त्या ।
त्वं च महेश सदैव ममात्मा स्वात्ममयं मम तेन समस्तम् ।।२।।

स्वात्मनि विश्वगते त्वयि नाथे तेन न संसृति [१]भीतिकथास्ति ।
सत्स्वपि दुर्धर[२]दुःखविमोहत्रासविधायिषु कर्मगणेषु ।।३।।

अन्तक मां प्रति मा दृशमेनां क्रोधकरालतमां विनिधेहि ।
शङ्करसेवनचिन्तनधीरो भीषणभैरवशक्तिमयोऽस्मि ।।४।।

इत्थमुपोढभवन्मयसंविद्दीधितिदारितभूरितमिस्रः ।
मृत्युयमान्तककर्मपिशाचैर्नाथ नमोऽस्तु न जातु बिभेमि ।।५।।

प्रोदितसत्यविरोधमरीचिः [३]प्रोक्षितविश्वपदार्थसतत्त्वः ।
भावपरामृतनिर्भरपूर्णे त्वय्यहमात्मनि निर्वृतिमेमि ।।६।।

मानसगोचरमेति यदैव क्लेशदशा तनुतापविधात्री ।
नाथ तदैव मम त्वदभेदस्तोत्रपरामृतवृष्टिरुदेति ।।७।।

शङ्कर सत्यमिदं व्रतदानस्नानतपोभवतापविदारि[४] ।
तावकशास्त्रपरामृतचिन्ता स्यन्दति चेतसि निर्वृतिधाराम् ।।८।।

नृत्यति गायति हृष्यति गाढं संविदियं मम भैरवनाथ ।
त्वां प्रियमाप्य सुदर्शनमेकं दुर्लभमन्यजनैः समयज्ञम् ।।९।।

वसुरसपौषे कृष्णदशम्यामभिनवगुप्तः स्तवमिममकरोत् ।
येन विभुर्भवमरुसन्तापं शमयति झटिति जनस्य दयालुः ।।१०।।

।। इति अभिनवगुप्तविरचितं भैरवस्तोत्रम् ।।

---

१. मे मृति–पा०। २. दुस्तर–पा०। ३. प्रेक्षित–पा०। ४. विनाशि–पा०।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

महोपदेशविंशतिका

ॐ नमोऽमृतनाथाय ।

प्रपञ्चोत्तीर्णरूपाय नमस्ते विश्वमूर्तये ।
सदा [1]दिव्यप्रकाशाय स्वात्मनेऽनन्तशक्तये ।।१।।

त्वं त्वमेवाहमेवाहं त्वमेवास्मि न चास्म्यहम् ।
अहं त्वमित्युभौ न स्तो यत्र तस्मै नमो नमः ।।२।।

अन्तर्देहे मया नित्यं त्वमात्मा च गवेषितः ।
न दृष्टस्त्वं न चैवात्मा यच्च दृष्टं त्वमेव तत् ।।३।।

भवद्भक्तस्य सञ्जातभवद्रूपस्य मे पुनः ।
त्वामात्मरूपं संप्रेक्ष्य तुभ्यं मह्यं नमो नमः ।।४।।

एतद्वचननैपुण्यं यत्कर्तव्येतिमूलया ।
भवन्मायात्मनस्तस्य केन कस्मिन् कुतो लयः ।।५।।

अहं त्वं त्वमहं चेति भिन्नता नावयोः क्वचित् ।
समाधिग्रहणेच्छाया भेदस्यावस्थितिर्ह्यसौ ।।६।।

त्वमहं सोऽयमित्यादि सोऽनन्तानि सदा त्वयि ।
न लभन्ते चावकाशं वचनानि कुतो जगत् ।।७।।

अलं भेदानुकथया त्वद्भक्तिरसचर्वणात् ।
सर्वमेकमिदं शान्तमिति वक्तुं न लज्ज्यते[2] ।।८।।

त्वत्स्वरूपे जृम्भमाणे त्वं चाहं चाखिलं जगत् ।
जाते तस्य तिरोधाने न त्वं नाहं न वै जगत् ।।९।।

जाग्रत्स्वप्नसुषुप्त्याद्या धारयंश्च निजाः कलाः ।
स्वेच्छया भासि नटवन्निष्कलोऽसि च तत्त्वतः ।।१०।।

---

१. नन्द–पा०। २. च लज्जते–पा०।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

त्वत्प्रबोधात् प्रबोधोऽस्य त्वन्निद्रातो लयोऽस्य यत् ।
अतस्त्वदात्मकं सर्वं विश्वं सदसदात्मकम् ।।११।।

जिह्वा श्रान्ता भवन्नाम्नि मनः श्रान्तं भवत्स्मृतौ ।
अरूपस्य कुतो ध्यानं निर्गुणस्य च नाम किम् ।।१२।।

पूर्णस्यावाहनं कुत्र सर्वाधारस्य चासनम् ।
स्वच्छस्य पाद्यमर्घ्यं च शुद्धस्याचमनं कुतः ।।१३।।

निर्मलस्य कुतः स्नानं वस्त्रं विश्वोदरस्य च ।
निर्लेपस्य कुतो गन्धो रम्यस्याभरणं कुतः ।।१४।।

निरालम्बस्योपवीतं पुष्पं निर्वासनस्य च ।
अघ्राणस्य कुतो धूपश्चक्षुर्हीनस्य दीपकः ।।१५।।

नित्यतृप्तस्य नैवेद्यं ताम्बूलं च कुतो विभोः ।
प्रदक्षिणमनन्तस्याऽद्वितीयस्य कुतो नतिः ।।१६।।

स्वयं प्रकाशमानस्य कुतो नीराजनं विभोः ।
वेदवाचामवेद्यस्य कुतः स्तोत्रं विधीयते ।।१७।।

अन्तर्बहिश्च पूर्णस्य कथमुद्वासनं भवेत् ।
भेदहीनस्य विश्वेऽत्र कथं च हवनं भवेत् ।।१८।।

पूर्णस्य दक्षिणा कुत्र नित्यतृप्तस्य तर्पणम् ।
विसर्जनं व्यापकस्याप्रत्यक्षस्य क्षमापणम् ।।१९।।

एवमेव परा पूजा सर्वावस्थासु सर्वदा ।
ऐक्यबुद्ध्या तु सर्वेशे मनो देवे नियोजयेत् ।।२०।।

।। इति महामाहेश्वराचार्य कृता महोपदेशविंशिका समाप्ता ।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

रहस्यपञ्चदशिका

ब्राह्मे मुहूर्ते भगवत्प्रपत्तिस्ततः समाधिर्नियमोऽथ सान्ध्यः ।
यामौ जपार्चादि ततोऽन्यसत्रं शेषस्तु कालः शिवशेषवृत्तिः ।।१।।

आदिमुखा कादिकरा टादिपदा पादिपार्श्वयुङ्मध्या ।
यादिहृदया भगवती संविद्रूपा सरस्वती जयति ।।२।।

फलन्ति चिन्तामणिकामधेनुकल्पद्रुमाः कांक्षितमेव पुंसाम् ।
अप्रार्थिता न प्रचितान् पुमर्थान् पुष्णातु मे मातुरुदारभावः ।।३।।

यया विना नैव करोति किञ्चिन्न वेत्ति नापीच्छति संविदीशः ।
तस्यै परस्यै जगतां जनन्यै नमः शिवायै शिववल्लभायै ।।४।।

सदोदिते भगवति सर्वमङ्गले शिवप्रदे शिवहृदयस्थिते शिवे ।
भजन्मनःकुमुदविकासचन्द्रिके द्विजन्मनः कुरु मम खे गतिं परे ।।५।।

प्रसीद सर्वमङ्गले शिवे शिवस्य वल्लभे ।
उमे रमे सरस्वति त्वमेव देवता परा ।।६।।

अमे अम्बिके अस्वरूपे अनाख्ये उमे रौद्रि वामे महालक्ष्मि माये ।
परे देवते पञ्चकृत्यैकलोले शिवे भैरवि श्रीमति त्वां प्रपद्ये ।।७।।

माये विद्ये मातृके मानिनि त्वं काये काये स्पन्दसे चित्कलात्मा ।
ध्यायेयं तां त्वां कथं स्वस्फुरत्तां ध्यायेयं त्वां वाचमन्तर्नदन्तीम् ।।८।।

त्वग्रुधिरमांसमेदोमज्जास्थिमये सदामये काये ।
माये मज्जयसि त्वं माहात्म्यं ते जनानजानानान् ।।९।।

लोहालेख्यस्थापितान् वीक्ष्य देवान् हा हा हन्तेत्याहुरेकेऽकृतार्थाः ।
देहाहन्ताशालिनां देहभाजां मोहावेशं कं न माया प्रसूते ।।१०।।

मायाविलासोदितबुद्धिशून्यकायाद्यहन्ताजनितादशेषात् ।
आयासकादात्मविमर्शरूपात् पायादपायात् परदेवता माम् ।।११।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

घोरात्मिकां घोरतमामघोरां परापराख्यामपरां परां च ।
विचित्ररूपां शिवयोर्विभूतिं विलोकयन् विस्मयमान आस्ते ।।१२।।

परापरापरापरामरीचिमध्यवर्तिनो ।
न मेऽभिदाभिदाभिदाभिदासु कश्चिदाग्रहः ।।१३।।

स्फुरति यत्तव रूपमनुत्तरं यदपरं च जगन्मयमम्बिके ।
उभयमेतदनुस्मरतां सतामभयदे वरदे परदेवते ।।१४।।

परमेश्वरि पञ्चकृत्यलीले परसंविन्मयि पार्वति प्रसीद ।
पतितं पशुपाशमुद्धरेमं शिशुमाश्वासय शीतलैः कटाक्षैः ।।१५।।

पूर्वसिद्धान् गुरून् देवान् देवीं नत्वाथ योगिनः ।
इमेऽभिनवगुप्तेन श्लोकाः पञ्चदशेरिताः ।।१६।।

।। इति रहस्यपञ्चदशिका ।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अवधूत सिद्धस्य

भक्तिस्तोत्रम्

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

भक्तिस्तोत्रम्

प्रत्यक्षवस्तुविषयाय जगद्धिताय
विश्वस्थितिप्रलयसम्भवकारणाय ।
सर्वात्मने विजितकोपमनोभवाय
तुभ्यं नमस्त्रिभुवनप्रभवे शिवाय ।।१।।

सत्यं न वेद्मि किमहं यदगोचरोऽसि
वाचस्पतेरपि गिरां किमुतास्मदादेः ।
भक्तिस्तथापि भवतो गुणकीर्तनेषु
यन्मां नियोजयति किं तदहं करोमि ।।२।।

खार्केन्दुवह्निमरुदात्ममहीपयोधि -
रष्टाभिरेव तनुभिर्भवता समस्ते ।
व्याप्ते जगत्यपरमिच्छति योऽत्र वक्तुं
कोऽन्यो गतत्रपतया सदृशोऽस्ति तेन ।।३।।

धृत्यादिभिः स्वतनुवृत्तिभिरेव यद्वद्
एको भवान् वहति सम्प्रति लोकमात्राम् ।
तद्वद् विभो यदि जगत्यपरोऽस्ति कश्चि -
न्निर्मत्सराः किमिति न प्रवदन्ति सन्तः ।।४।।

योगादपास्ततमसो भुवनत्रयेऽपि
मुख्याः पितामहपुरन्दरविष्णवोऽपि ।
अद्यापि देव न विदन्ति कृतप्रयत्ना -
स्तत्त्वं तवेति तदहो महदिन्द्रजालम् ।।५।।

भावोद्भवस्थितिविपत्करणप्रवृत्तौ
संज्ञा विभिन्नरचनास्त्वयि संभवन्ति ।
साम्ये स्थितः प्रतिनिवृत्तसमस्तकार्यो
नेन्द्रो न विष्णुरसि नापि पितामहोऽसि ।।६।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

केचिद् भवन्तमनुपाधिमनामरूपं
विज्ञानमेव परमार्थतया प्रपन्नाः ।
अन्ये त्रिधातुपरिकल्पनया विशुद्ध -
मूचुः स्वशास्त्रसमयं परिपालयन्तः ।।७।।

सांख्यैः समस्तजगदुद्भवकारणानि
प्रोक्तानि यानि खलु सत्त्वरजस्तमांसि ।
रूपाणि तान्यपि तवैव समग्रशक्तेः
किं तन्न यत् परिगतं भुवि शक्तिभिस्ते।।८।।

नित्यं विनाशि यदरूपमनेकमेक -
मुग्रं प्रशान्तमगुणं गुणसंनिविष्टम् ।
संसारिणं वशिनमध्रुवमस्वतन्त्रं
देवं भवन्तमसकृत् कवयः स्तुवन्ति ।।९।।

वाचामतीतविषयो निरुपाख्यभावात्
प्रोक्तोऽसि शून्यमिति कैश्चिदसत्प्रतिज्ञैः ।
त्वामेव केचिदपि वाचकवाच्ययोगात्
सन्तं विशेषणवशात् परिकल्पयन्ति ।।१०।।

आद्यन्तयोस्त्रिभुवनस्य भवन्तमेव
यं वैदिकाः पुरुषमाहुरभेद्यमाद्यम् ।
भूयस्तमेव जननप्रलयान्तराले
संसारजालमिति जातविकारमूचुः ।।११।।

आत्मानमात्मनि यदा स्वयमात्मनैव
संयम्य तिष्ठसि निमीलितसर्वशक्ते ।
लीनं तदा त्वयि जगत् खलु तावदास्ते
यावत् तवोद्भवति नाथ पुनः सिसृक्षा ।।१२।।

त्वत्तः परं जगति नाथ न चास्ति किञ्चि -
न्नाणुः क्वचिन्न च महान् भवतः सकाशात् ।
सर्वात्मकोऽसि भवतैव समस्तमेत -
दन्तः कृतं ननु जगन्मणिनेव सूत्रम् ।।१३।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

चेतांसि यानि सुखदुःखविशेषभाञ्जि
ये च प्रधानपरिणामविकारभेदाः ।
त्वं देव जन्मनि पुनः प्रलये च तेषां
हेतुः समस्तपयसामिव तोयराशिः ।।१४।।

अस्तास्त्वया सुरगुरो! स्वतनौ यदेव
खात्मानलानिलजलावनिचन्द्रसूर्याः ।
लोकेऽपरस्य भवता ननु कारणस्य
मूले तदैव निहितः सकले कुठारः ।।१५।।

स्तौति प्रसह्य तव षोडशधा विभज्य
मूर्तिं प्रमाणरचनो मुनिरक्षपादः ।
द्रव्यादिवस्तुरचनाभिरुपात्तभेदै -
र्वैशेषिके कणभुजाऽपि ननु स्तुतोऽसि ।।१६।।

बध्नाति काचिदपि शक्तिरनन्तशक्तेः
क्षेत्रज्ञमप्रतिहता तव पाशजालैः ।
ज्ञानासिना च विनिकृत्य गुणानशेषा -
नन्या करोत्यभिमुखं पुरुषं विमुक्तौ ।।१७।।

एकां बत च्युतसमस्तभवप्रवृत्ति -
माहुर्विमुक्तिमिति शान्ततमामवस्थाम् ।
स्थित्युद्भवप्रलयिनीमपरामवस्थां
संसारिणीमिति वदन्ति तवैव सन्तः ।।१८।।

अज्ञानतीव्रतिमिरोपहतप्रकाशा -
स्त्वद्दूषणं प्रति विनष्टधियोऽपि सन्तः ।
तावत् त्यजन्ति न भवं भगवंस्त्वयैव
यावत् स्वशक्तिविभवैर्न विबोधिताः स्युः ।।१९।।

गुह्यं गुहाश्रयमजं परमं पवित्र -
मेकं विभुं सकलवाङ्मयबीजमाद्यम् ।
सम्यक्प्रयुक्तमभिवाञ्छितहेतुभूत -
माहुर्भवन्तमपरे ननु शब्दतत्त्वम् ।।२०।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तीर्थक्रियाव्यसनिनः स्वमनीषिकाभि-
　　रुत्प्रेक्ष्य तत्त्वमिति यद्यदमी वदन्ति ।
तत्तत् त्वमेव भवतोऽस्ति न किञ्चिदन्यत्
　　संज्ञासु केवलमयं विदुषां विवादः ।।२१।।

सर्वज्ञबीजमविकारमलुप्तशक्तिं
　　निश्रेयसाभ्युदयमार्गविधानहेतुम् ।
त्वामेव देव! गुरवः प्रथमेऽपि सम्य-
　　गाराध्य तीर्थकरभा महिमानमापुः ।।२२।।

सर्वज्ञता यदपि लक्षणया परस्य
　　मुख्या तथापि भवतः परमेश्वरत्वात् ।
स्वातन्त्र्यमप्यनुपचारमुपैति योगं
　　त्वय्येव नाथ जगतः खलु कर्तृभावात् ।।२३।।

दृश्येत कश्चिदधिगच्छति वस्तुजात-
　　मन्योऽनुमानसमयैरपरोऽपि शब्दैः ।
प्रत्यक्षवत्तु भवतः पुनरक्रमेण
　　सर्वं करामलकवद्विदितं प्रमेयम् ।।२४।।

अस्यात्मनो विषयिणः परतन्त्रवृत्ते -
　　रस्याश्च नाथ जगतः प्रकृतेः परायाः ।
संयोजने च विरतौ च परोऽसि हेतुः
　　संसारचक्रपरिवर्तनयन्त्रवाहः ।।२५।।

कुर्वन् मुहुः स्वयमतन्द्रितयाऽपि बुद्ध्या
　　कर्माणि शास्त्रसमयोपनिबन्धनानि ।
संयुज्यते समुचितेन तु यत्फलेन
　　तच्चेष्टितस्य फलमप्रतिमं तवैव ।।२६।।

उत्साहशक्तिरहितान् विकलानपुण्यान्
　　मन्दान् निरस्तसमयानघृणानसत्यान् ।
आवाञ्छितेन विनियोजयता फलेन
　　लुप्तस्त्वया पुरुषकारविशेषवादः ।।२७।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कर्माणि वेदविहितानि सुखप्रदानि
प्रेत्यैति तत्फलमिदं फलमन्तवच्च ।
त्वच्छासने सुखमनन्तमशेषदोष -
प्लोषाय भक्तिविहितां प्रणतिं यदाहुः ।।२८।।

प्राकाम्यमात्मनि यदा प्रकटीकरोषि
व्यक्तीः प्रतिक्षणमनेकविधा दधानः ।
त्वय्येव सोऽपि भगवन्! भजतेऽर्थवत्तां
प्रायो विदग्धरचितः क्षणभङ्गवादः ।।२९।।

यत्तीर्थिकैर्जगति जन्मभिरप्रमेयै -
र्नासाद्यते पदमिति स्वमतेषु गीतम् ।
बुद्ध्यैकजन्मिकमिति ब्रुवतां विगृह्य
तेषां त्वया ननु कृतश्चरणः शिरस्सु ।।३०।।

लुब्धा मलीमसधियः समयादपेता
रागोपरक्तमनसो वशिनोऽप्यसन्तः ।
त्वच्छासने विहितलिङ्गपरिग्रहेण
मुच्यन्त इत्यतिमहांस्तव सिंहनादः ।।३१।।

अव्याहतस्य भगवन्! भवदागमस्य
चिन्तामणेरिव महानसमः प्रभावः ।
सम्यग् विधानविहितां यदवाप्य दीक्षां
ज्ञानादृतेऽपि खलु केवलतामुपैति ।।३२।।

ज्ञानं तिरस्कृतमिदं पशुवासनाभि-
रास्तां यदात्मनि विमुक्तिफलस्य बीजम् ।
तद्वारिणेव भगवन्! भवदागमेन
संपादितं भवति मोक्षफलप्रसूत्यै ।।३३।।

जन्तौ यदा तव कदाचिदनुग्रहेच्छा
क्षीणाशये भवति जन्मभिरप्रमेयैः ।
संसारजालमतिबाह्य तदैव शान्ति-
मात्यन्तिकीं ब्रजति बोधविवर्जितोऽपि ।।३४।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

एतच्चतुर्दशविधं भुवनं समस्तं
संसारमण्डलमवान्तरभेदभिन्नम् ।
त्वं पासि हंसि विदधासि यदृच्छयेति
मत्वा न लिप्यत इति प्रवदन्ति सन्तः ।।३५।।

ऐश्वर्यमप्रतिहतं सहजो विराग-
स्तृप्तिर्निसर्गजनिता वशितेन्द्रियेषु ।
आत्यन्तिकं सुखमनावरणा च शक्ति-
र्ज्ञानं च सर्वविषयं भगवंस्तवैव ।।३६।।

यत्नादुपात्ततपसोऽपि हि यद् दुराप-
मात्यन्तिकं सुखमपास्तसमस्तदुःखम् ।
नीताः खरोष्ट्रतरवोऽपि यदित्यहो ते
स्वातन्त्र्यमप्रतिहतं भुवनत्रयेऽपि ।।३७।।

येनामलस्फुरितरत्नशिखावितानो
हेमीकृतो निपतता सकलः स मेरुः ।
तस्यातुलं फलमिदं तव शुक्रबिन्दो-
रेकस्य यत् कनकभूषणमाप लोकः ।।३८।।

कालेन संचितमपुण्यमनन्तकल्पं
लोकत्रयस्य यदभूत् त्रिपुरप्रकारम् ।
दग्धं त्वया तदिति सम्यगवेत्य कस्य
मूढादृते भवति न त्वयि पक्षपातः ।।३९।।

क्षीरोदसारमथनप्रतिलब्धजन्म-
वित्रासितत्रिदशसंहति कालकूटम् ।
निर्मत्सरेण पिबता जगतो हिताय
पीतस्त्वयैव सकलो ननु साधुवादः ।।४०।।

शान्तात्मनाऽपि भगवन् । भवता प्रसहय
नेत्रोद्भवेन दहता दहनेन कामम् ।
अल्पीयसोऽपि महतां समतिक्रमस्य
मन्ये जनाय विषमः कथितो विपाकः ।।४१।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स्नेहाद् विधाय दयितां वपुषोऽर्धभागे
धुर्यस्तथापि भगवन् ! शमिनां त्वमेव ।
त्रैलोक्यविस्मयकृतां तव चेष्टिताना-
मद्यापि कश्चिदपि नानुकृतिं करोति ।।४२।।

उच्चैस्तिरस्कृतमिदं भुवनं समस्तं
योगप्रभावजनितेन बलेन येन ।
तस्य प्रजापतिसुतस्य हृतः प्रसह्य
गर्वस्त्वयेति बत कस्य न विस्मयोऽत्र ।।४३।।

अङ्गुष्ठकेन भवता विनिपीडितस्य
यस्यासवो न विगताः सहसा कथञ्चित् ।
यत्नात् स एव हरिणा विजितश्चिरेण
नीत्या दशानन इति क्व नु विस्मयोऽयम् ।।४४।।

मन्दाकिनीकनकपङ्कजपारिजात-
पुष्पाधिवासितजला नभसः पतन्ती ।
लग्ना तुषारकणिकेव जटाग्रभागे
केनापरेण भवतेव धृताऽनुगृह्य ।।४५।।

आस्तां तवान्यदपि तावदतुल्यकक्ष्य-
मैश्वर्यमीश्वरपदस्य निमित्तभूतम् ।
त्वच्छेफसोऽपि भगवन्! न गतोऽवसानं
विष्णुः पितामहयुतः किमुतापरस्य ।।४६।।

श्वेतस्य मृत्युदशनान्तरवर्तिनोऽपि
सूनापशोरिव वधावसरे स्थितस्य ।
प्राणान् निगृह्य भवता यदकारि तस्य
तत्कस्य विस्मयमलं न करोति लोके ।।४७।।

प्रीतेन यद्वदुपमन्युरपास्तमन्युः
क्षीरोदसंविभजनेन कृतस्त्वयाऽसौ ।
तद्वद्विभो! यदि जगत्यपरोऽस्ति कश्चि-
न्निर्मुच्य मत्सरममी प्रवदन्तु सन्तः ।।४८।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

वृत्रद्विषः सकुलिशस्य भुजस्य शक्ति-
रुत्तम्भिता विहसता भवता यथैव ।
पूष्णस्तथैव दशनेषु भगस्य चाक्ष्णो-
र्दक्षस्य च क्रतुफले ममता निरस्ता ।।४९।।

विष्णुप्रजापतिपुरन्दरलोकपालै-
स्तिर्यक् सुरासुरनरैरपरैश्च दिव्यैः ।
लोके यथा पशुपते! तव कल्पितानि
स्थानानि तद्वदपरस्य वदन्तु कस्य ।।५०।।

शक्रात्मजस्य निजशार्ङ्गरथाङ्गपाणौ
कृष्णे स्थितेऽपि शकलीकृतदानवेन्द्रे ।
द्रोणापगेयकृपकर्णभयार्दितस्य
शं शङ्कर त्वमकृथा भृशमर्जुनस्य ।।५१।।

आराधितेन भगवन्! भवता हिरण्य-
वृष्टिं मरुत्तनृपतेः किरता यियक्षोः ।
ये ख्यापिता जगति भक्तजनप्रसादा-
स्तन्नाद्भुतं तव विभो! परमेश्वरत्वम् ।।५२।।

तीव्रव्रतस्य कणधूमनिपानतप्त-
सर्वेन्द्रियस्य भवता भृगुनन्दनस्य ।
तुष्टेन शर्म यदकारि तदा स शुक्रः
शीतोष्णवातजलदैर्दिवि भासमानः ।।५३।।

एतानि पासि भुवनानि यदा विगृह्य
सेयं विभूतिरतुला तव तावदास्ताम् ।
दक्षप्रसूतिमपि ते भुवनत्रयेऽपि
कश्चिन्न वेत्ति भवता सह को विवादः।।५४।।

उन्मार्गवर्ति गुणदोषविवेकमन्द-
मुग्रं मलीमसमसंयतमल्पसारम् ।
भीतार्तिनाशन दयापर लोकनाथ
देव प्रसीद मम चित्तमिदं प्रशाधि ।।५५।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

एतानि नाथ! चपलानि दुराशयानि
लुब्धानि रम्यविषयोपनिबन्धनानि ।
दुर्दान्तवाजि सदृशान्यविधेयभावाद्
वश्यानि मे कुरु सदैव षडिन्द्रियाणि ।।५६।।

नन्दीश्वरस्य मनुजस्य सतोऽतिकष्टं
कालेन मृत्युमचिरेण निनीषितस्य ।
सर्वात्मनाऽऽत्मसमता यदकारि तुष्ट्या
नाश्चर्यमेतदभवन्न च भावि नास्ति ।।५७।।

संसारपाशवशमेतदनीशमीश!
मिथ्याकुतर्कतिमिरोपहतप्रकाशम् ।
चेतो मम क्षपितमन्मथ! दग्धकाल!
सत्सेविते पथि नियोजय देवदेव !।।५८।।

कायानुबन्धिभिरनेकविधैरपायै
रागादिभिश्च मनसि प्रतिलब्धभावैः ।
मूढः पृथक् पृथगहं प्रविलुप्यमान-
स्त्वत्तः परं कथय कं शरणं व्रजामि ।।५९।।

आयासकेन खलु कामपिशाचकेन
क्रोधग्रहेण च पुनर्निरवग्रहेण ।
ग्रस्तस्य विक्लवधियः प्रविमुक्तिहेतो -
र्यत्कृत्यमत्र मम तत्र तवैव शक्तिः ।।६०।।

या सा जगत्परिभवस्य निमित्तभूता
हेतुः स्वयं सुरपतेरपि लाघवस्य ।
सा मां विडम्बयति नाथ सदैव तृष्णा
भिन्धि प्रसह्य भगवन्नपुनर्भवाय ।।६१।।

येनावृतः पशुरयं हतबोधशक्ति-
स्तत्त्वं न वेत्ति जगते हितमात्मने वा ।
छिन्धि प्रसह्य भगवन् मम तत्समस्त-
मज्ञानजं तिमिरमस्तु महान् प्रकाशः ।।६२।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सर्वापदां निलयमध्रुवमस्वतन्त्र-
मासन्नपातमविवेकमसारमङ्गम् ।
यावच्छरीरकमिदं न विपद्यते मे
तावन्नियोजय विभो कुशलक्रियासु ।।६३।।

यत् खिद्यते कमलयोनिरपि स्तुवानः
साक्षाच्चतुर्भिरपि नाम मुखैर्भवन्तम् ।
तत् के वयं तव गुणस्तवनक्रियासु
भक्तिः प्रमाणमिति सर्वमिदं क्षमस्व ।।६४।।

कृत्वा मया तव नुतिं जगदेकबन्धो
भक्त्या स्वबुद्धिसदृशीमवधूतनाम्ना ।
पुण्यं यदल्पमपि किञ्चिदुपात्तमत्र
लोकस्य तेन भगवंस्त्वयि भक्तिरस्तु ।।६५।।

।। इति श्रीमदवधूतसिद्धविरचितं भक्तिस्तोत्रं समाप्तम् ।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

राजानकक्षेमराजस्य

बोधोल्लासविलासः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

बोधोल्लासविलासः

ॐ नमः शिवाय सततं पञ्चकृत्यविधायिने ।
चिदानन्दघनस्फारपरमार्थविभासिने ॥१॥

चितिः स्वतन्त्रा विश्वस्य हेतुरित्यभिधीयते ।
स्वातन्त्र्यरूपा ज्ञाता च सिद्धीर्या संप्रयच्छते ॥२॥

सा स्वभित्तौ स्वेच्छयैव विश्वस्योन्मीलनाय च ।
नानारूपमवैचित्र्याद् ग्राह्यग्राहकभेदतः ॥३॥

विश्वस्य तस्य वैचित्र्यं ग्राह्यभेदेन संस्थितम् ।
नानावैचित्र्ययोगेन चोत्तमाधमसङ्ख्यया ॥४॥

चितिसङ्कोचनाच्चित्तं चेतनोऽपि महेश्वरः ।
वटधानीव तत्तत्र विश्वरूपं च तद्विदुः ॥५॥

चैतन्यमात्मनो रूपं शुद्धमत्यन्तनिर्मलम् ।
तदेव नियमासक्तं चित्तं चिदभिधीयते ॥६॥

अर्थोन्मुखतया संविच्चित्ते विश्रान्तिमागता ।
संकोचात्मप्रधानत्वाच्चितिं चित्तं विदुर्बुधाः ॥७॥

माया प्रमाता चिद्रूपस्तत्सत्त्वेन [च] देहिनाम् ।
वर्तते विषयासक्तः सद्विवेकविवर्जितः ॥८॥

स चैकः प्रथितश्चित्रं कलासत्त्वगुणादिभिः ।
सप्तप्रमातृकत्वेन षट्त्रिंशत्तत्त्वसङ्ख्यया ॥९॥

एकः सर्वगतः शुद्धस्सम्बोधात्मा महेश्वरः ।
सैवाहन्तापरिज्ञानान्मुक्तिः करतले स्थिता ॥१०॥

सप्तप्रमातृकत्वेन षट्त्रिंशत्तत्त्वसङ्ख्यया ।
भावितः स महेशानि मोक्षलक्ष्मीः प्रवर्तते ॥११॥

तद्भूमिकादर्शनाद्यास्सर्वा एव न संशयः ।
भूमिकाः कृत्रिमा यद्वन्नरो गृह्णाति स्वेच्छया ॥१२॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तद्वदेव चिदानन्दः स्वेच्छोच्छलितवृंहितः ।
आत्मा गृह्णाति विपुला दर्शनाद्या विभूतयः ।।१३।।

चिदानन्दसमुल्लासोल्लासितात्मा विराजते ।
चित्तं स्वशक्तिसंकोचात् संसारे मलिनायते ।।१४।।

अपूर्णोऽस्मीति विविधैर्मलैस्स मलिनीकृतः ।
मायीयाणवकार्माख्यैर्व्यापकोऽपि जगद्विभुः ।।१५।।

व्यापी यद्वन्महादेवः कुरुते पञ्चकृत्यताम् ।
तद्वदेवायमात्माऽपि कुरुते शक्तिमोहितः ।।१६।।

शक्तेर्विकासाच्छक्तीशो गीयते तत्त्ववादिभिः ।
सङ्कोचनात्सङ्कुचितः संसारीत्यभिधीयते ।।१७।।

मायारूपं हि यत्किञ्चिदालोकयितुमुद्यता ।
सा स्वसृष्टिर्विजानीयात् साऽस्य शक्तिःस्थितिर्मता ।।१८।।

संसारात्संहृता देवी चिदैक्येनाग्रहीन्मतम् ।
तदेकसारा प्रथनात्तिरोधानाऽभिधीयते ।।१९।।

इत्थं सदा सन्निहितः पञ्चवाहविधिक्रमात् ।
ज्ञातचिन्तामणिरमावज्ञानात् काष्ठलोष्टवत् ।।२०।।

सद्विमर्शबलेनैव नित्यं यः परिशीलयेत् ।
स मुक्तः सर्वबन्धेभ्यो नित्यानन्दमयो भवेत् ।।२१।।

चिद्वह्निर्ग्रसते सोऽयं सुप्रबुद्धोऽप्यसौ यदा ।
तदाऽसौ विमलो ज्ञेयश्चिद्वह्निः सर्वभक्षकः ।।२२।।

एतद्बलेन संयुक्तो योगी निर्वाणलक्षणः ।
पदं प्राप्नोति विमलं सोऽचिरान्नात्र संशयः ।।२३।।

चिद्वह्निबललाभेऽपि विश्वमाभाति चिन्मयम् ।
स्वानन्दामृतकल्लोलमेतद्वश्चलितं बहिः ।।२४।।

तदेवाश्यानतां यातं भावरूपैर्विभाव्यते ।
स्वात्मा महेश्वरो देवः क्रीडते परमेश्वरः ।।२५।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

इति यस्सततं वेत्ति स मुक्तो मोचयत्यपि ।
सत्त्वव्रातं क्षणेनैव घोरात् संसारबन्धनात् ।।२६।।

यः कश्चिदानन्दबलः स स्वरूपपदस्थितः ।
इति यस्य समुल्लासोल्लासितोदयशालिनः ।।२७।।

तस्य स्वरूपनिष्ठस्य व्युत्थानेऽपि तदर्थ्यते ।
एतत्प्रयत्नसामर्थ्याज्जनैरेवाधिगम्यते ।।२८।।

मध्यं धामविकासाच्च चिदानन्दः प्रकाशते ।
तत्प्रकाशाद्दिव्यदृष्टिर्ज्ञानरूपा विभाव्यते ।।२९।।

निर्मला सुप्रभा शुद्धा नित्यानन्दमयी परा ।
निर्देहच्छेदजालापि ज्ञानदृष्टिर्विजृम्भते ।।३०।।

मध्यधामविकासे तु उपायो बलवत्स्थितिः ।
विकल्पक्षयसङ्कोचविकासाद्या अनेकशः ।।३१।।

अकिञ्चिच्चिन्तनादेव विकल्पानां क्षयो भवेत् ।
चिद्बोधादुल्लसच्छक्ती रक्ताऽसौ भावमण्डले ।।३२।।

तत्रानुरक्ता दिव्यौघं पश्यते विमलात्मकम् ।
शक्तिसङ्कोचमेतद्धि प्रोच्यते ब्रह्मवादिभिः ।।३३।।

आद्यन्तकोटिविश्रामबिन्दुनादलयास्तथा ।
अशङ्कितभयक्रोधो वीभत्सादिपरिग्रहः ।।३४।।

इत्येतत्कथितं देवि मध्यधामविकासकम् ।
तत्रासक्तो दिनैरेव प्राप्नोति परमं पदम् ।।३५।।

योऽन्तःसमाधिसंस्कारो भ्रमते विमलद्विषाम् ।
सविमर्शबलादेव विमृश्य च पुनः पुनः ।।३६।।

व्युत्थानेऽपि यतस्तस्य स्वरूपं सम्प्रकाश्यते ।
योगिनो बोधनिष्ठस्य नित्यानन्दरसस्य च ।।३७।।

तत्प्रकाशानन्दमयी मन्त्रवीर्योपवृंहितम्(ता) ।
पूर्णाहन्ता चिदित्यन्तस्समुल्लसति योगिनः ।।३८।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तत्रासौ विलसन्योगी मन्त्रेश्वरपदे स्थितः ।
तत्रासक्तो विभुर्यद्वत् क्रीडते शक्तिवृंहितः ।।३९।।

एवं स्वतन्त्रता तस्य व्यापकस्य जगद्विभोः ।
नानाभेदजुषश्चित्रपदस्था स्वाम्यखण्डिता ।।४०।।

एतदद्वयमित्युक्तं ज्ञानामृतमनुत्तमम् ।
यः पिबेच्छाम्यते तस्य संसारविषमुल्वणम् ।।४१।।

बोधोल्लासविधानोऽयं शिवप्राप्त्यै महात्मनाम् ।
पूर्णज्ञानोदधिमयात्कल्लोलादिदमुद्धृतम् ।
राजक्षेमाभिधानस्य शास्त्रमत्यन्तनिर्मलम् ।।४२।।

।। इति बोधोल्लासविलासो नाम बोगशास्त्रम् ।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

राजानकनागस्य

१. परमार्चनत्रिंशिका

२. चित्तसन्तोषत्रिंशिका

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

परमार्चनत्रिंशिका

ध्यायेदात्मनि देवेशं चन्द्रकोटिसमप्रभम् ।
स्वच्छमुक्ताफलप्रख्यं स्फटिकादिसमप्रभम् ।।
कुन्देन्दुगोक्षीरनिभं स्फाटिकाद्रिसमप्रभम् ।
शुभ्रहारेन्दुकान्तादिमितभूषणभूषितम् ।।
सितचन्दनलिप्ताङ्गं कर्पूरक्षोदधूसरम् ।
स्फुरच्चन्द्रामृतस्फारबहुलोर्मिपरिप्लुतम् ।।
सोममण्डलमध्यस्थमेकवक्त्रं त्रिलोचनम् ।
सितपद्मोपविष्टं तु बद्धपद्मासनस्थितम् ।।
चतुर्भुजं विशालाक्षं वरदाभयपाणिकम् ।
पूर्णचन्द्रनिभं शुभ्रममृतेनैव पूरितम् ।।
कलशं धारयन्तं हि जगदाप्यायकारकम् ।
परिपूर्णं तथा चन्द्रं वामहस्तेऽस्य चिन्तयेत् ।।

ॐ स्नानपूजनसमाधिभिः क्रमाद्यन्महात्मभिरवाप्यते पदम् ।
कैश्चिदक्रमत एव यन्मया तत्समर्चनमिषेण कथ्यते ।।१।।

बालिकारचितवस्त्रपुत्रिकाक्रीडनेन सदृशं तदर्चनम् ।
यत्र शाम्यति मनो न निर्मलं स्फीतचिज्जलधिमध्यमाश्रितम् ।।२।।

किं तदर्चनमनल्पकल्पनाजालशम्बरनिपातितात्मनाम् ।
यत्र नास्ति सविकल्पनोज्झितः स्फीतसौख्यशिवसङ्गमोत्सवः ।।३।।

अप्रयत्नमनिकेतनं पदं दिव्यसाध्यतरसैव[1] वृत्तयः ।
यत्र यान्ति विलयं न सर्वतः किं तदर्चनमसौ पराभवः ।।४।।

यत्र वर्षति न खेचरी स्थितिश्चित्सुधारसभरौघनिर्झरम् ।
देहचित्तपरिपीडनावहं किं तदर्चनमसौ पराभवः ।।५।।

खेचरीप्रभृतिपञ्चकात्मना व्याप्तिमम्बरगतां निभालयन् ।
हृद्विकाससुभगं भवापदो यत्र मुञ्चति न किं तदर्चनम् ।।६।।

---

१. मनसैव - पा०

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

यत्र साहससमाधिसंश्रयः प्रस्फुरद्विमलबोधनिर्भरः ।
स्फीतसंविदुदयं न विन्दते सर्ववृत्तिसु किमेतदर्चनम् ।।७।।

विश्वसंहृतिरसैकतत्परो लेलिहानरसनाकुलोपमः ।
यत्र चिच्छिखिशिखासु हूयते लीलयैव न किमेतदर्चनम् ।।८।।

मुग्धमन्थरमनोहरेक्षणः प्रोल्लसत्पुलकलम्बितानन: ।
मध्यमां भुवनमल्पसम्पदं यत्र नाश्रयति किं तदर्चनम् ।।९।।

मानमेयमितिकल्पनोज्झितो निर्विकारमनिकेतनः शिवः ।
गाढगाढमवगाह्यते क्षणान्नैव यत्र ननु किं तदर्चनम् ।।१०।।

व्योमकल्पममितं निजं वपुर्वीक्ष्य चित्परसुधारसाञ्चितम् ।
स्वात्मनात्मनि निरस्तकल्पनो यत्र हृष्यति न किं तदर्चनम् ।।११।।

निर्निकेतनिरुपाधिनिर्मलस्फारचिद्रविमरीचिसञ्चयैः ।
विश्वमारचितमीक्ष्य विस्मयं यत्र नाश्रयति किं तदीक्षणम् ।।१३।।

यत्र नित्यपरहर्षनिर्भरश्चित्सुधारसनिपातघूर्णितः ।
ध्यानयोगकलनासु लज्जते नीरसासु न किमेतदर्चनम् ।।१४।।

शक्तिविस्तरविमर्शविस्फुरत्कन्दयुग्मयुगपद्विगाहनात् ।
भैरवं वपुरुदारचेष्टितं यत्र न स्फुरति किं तदर्चनम् ।।१५।।

दिव्यखेचरदृशा निरीहया नादविन्दुमयभावसञ्चयम् ।
यत्र शुष्कमिव पावकस्तृणं न क्षयं नयति किं तदर्चनम् ।।१६।।

शान्तिमेति न विकल्पविप्लवश्चिच्चमत्कृतिरसो न वर्धते ।
लुप्यते न घनवासनावनं क्वापि तृप्तिरसमा न जायते ।।१७।।

मन्यते न कृतकृत्यतां मनो द्वैतमेधतिमिरं न भिद्यते ।
यत्र दोषशतमङ्गलं मनो न प्रसीदति किमेतदर्चनम् ।।१८।।

चिन्नभस्सरसि सारसीं परां शक्तिमच्छविभवां प्रबोधयन् ।
मन्त्रवीर्यममितं निसर्गतो यत्र नाश्रयति किं तदर्चनम् ।।१९।।

निर्विकारमजरं निरामयं निर्विकल्पमजडं निजं वपुः ।
वीक्ष्य जन्ममरणोदितं भयं यत्र मुञ्चति न किं तदर्चनम् ।।२०।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

शान्तवीचिचयसिन्धुसन्निभां सर्वसंविदुदयावनिं पराम् ।
सृष्टिसंस्थितिलयप्रशक्तिभिर्विश्वसुन्दरविवर्तवर्तिनीम् ।।२१।।

शक्तिचक्रपरमाधिदेवतामम्बरप्रथमभूमिकामजाम् ।
मङ्गलामसममन्त्रमातरं यत्र पश्यति न किं तदर्चनम् ।।२२।।

सोमसूर्यदहनेन्धनोद्यतस्फीतचिज्ज्वलनदीप्तिभास्वरः ।
दुर्निरीक्ष्यगतिरक्रमः शिवो भाति यत्र न किमेतदर्चनम् ।।२३।।

आत्मनात्मनि न जानते विधिं निस्तरङ्गपरबोधभास्वराः ।
यत्पदस्थितिजुषो महाजना मुक्तिसंसृतिसमानबुद्धयः ।।२४।।

यद्यदापतति वेद्यताभुवं तेन तेन ननु यद्विवर्जितम् ।
नित्यनिर्मलसमाधिभूमयो यत्पदे विमतिबालकल्पनाः ।।२५।।

यद्विशृङ्खलमहोदयोल्लसच्छक्तिपातवशतो विजृम्भते ।
तत्पदं यदि गुरुप्रसादतो लब्धमुत्तममथार्चितः शिवः ।।२६।।

भावसञ्चयविमुक्तविग्रहा विश्वमय्यपि परप्रथात्मिका ।
कापि संविदमलाम्बरप्रभा जृम्भते यदि तदार्चितः शिवः ।।२७।।

किञ्चनापि च न मुच्यते क्वचित् किञ्चनापि न च गृह्यते क्वचित् ।
स्वं वपुर्विमलबोधनिर्भरं दृश्यते यदि तदार्चितः शिवः ।।२८।।

भैरवाः विविधकल्पनात्मकाः प्रोल्लसन्ति बहवो यतोऽम्बिका ।
सा यतः स्फुरति तत्परं पदं भाति चेद् गुरुदृशा शिवोऽर्चितः ।।२९।।

आसादितं गुरुमुखाादिदमप्रयत्नं सिद्धंशिवार्चनमपाप्मधियामवाप्यम् ।
यत्तन्मया निगदितं तदनल्पवाञ्छासम्बोधनाय सुधियां शिवशक्तिभाजाम् ।।३०।।

अनवस्थितचिद्व्योम परमामृतवृंहितः ।
नागाभिधो व्यधादेतां परमार्चनत्रिंशिकाम् ।।३१।।

।। श्री राजानकनागविरचिता परमार्चनत्रिंशिका समाप्ता ।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

चित्तसन्तोषत्रिंशिका

ॐ लोकोत्तरानुभवसस्मितघूर्णमान-स्वानन्दसुन्दरविनिर्मलनिर्निमेषा ।
यत्स्फारतः पशुरपीश्वरतामुपैति सा कापि दृग्विजयते गुरुपुङ्गवानाम् ।।१।।

दिष्ट्या भवानलशिखाशततापतप्तं जन्माटवीषु विषमासु कदर्थितं यत् ।
चेतस्तदेतदधुनामलचित्सुधाब्धिमध्ये निमग्नमसमां भजते प्रशान्तिम् ।।२।।

व्यामूढमन्धमिव संशयदोषदुष्टं चेतो यदेतदभवद्भवदुःखपात्रम् ।
जातं तदद्य गुरुपादसरोजसेवासञ्जातनिर्मलविबोधमहाप्रकाशम् ।।३।।

सङ्कोचमाश्रितवतो निविडं विमोहाद्यस्याभवद्भयमिहेन्द्रियपन्नगेभ्यः ।
चेतस्तदाप्य विमलोर्जितसंविदाज्ञं निश्शङ्कमद्य रमते विषयाटवीषु ।।४।।

कन्दर्पबाणविषयं हरिणेक्षणाभिः पीतं हतं कवलितं मुषितं यदासीत् ।
तत्पात्रतामुपगतं परमोक्षलक्ष्मीप्रेमामृताप्लुतकटाक्षपरम्पराणाम् ।।५।।

क्लिष्टं यदेतदभवज्जपकष्टयोगप्राणप्रवाहविनिरोधकदर्थनाभिः ।
चेतस्तदद्य परमाद्वयसामरस्यसञ्जातसम्मदरसासवमत्तमास्ते ।।६।।

यो भेदतीव्रशिशिरप्रसरोपघातभीतो मनोमधुकरो हतशक्तिरासीत् ।
आसाद्य सोऽद्य शिवधाममधुं सदास्ते संविल्लताकुसुमसौरभपानमत्तः ।।७।।

त्यक्तस्वतन्त्रनिजरूपमहाप्रभावं यत्कर्मबिन्दुधरणीषु निलीनमासीत् ।
स्वच्छप्रभाप्रसरपूरितसर्वलोकं चेतश्चिदम्बरपदेन तदद्य माति ।।८।।

यत्नेन वाञ्छितमनल्पविकल्पजालविघ्नैस्तिरस्कृतमवाप न यत्प्रवेशम् ।
दुर्भेदभिन्नविषमार्गलभिन्नमार्गं चेतस्तदद्य रमते शिवमन्दिरान्तः ।।९।।

योगव्रतादिनियमैरुपसेवितापि नावापदर्शनपथं किल यस्य जातु ।
संवित्प्रियासुभगमूर्जितभाग्यसम्पच्चेतस्तदद्य न जहाति मुहूर्तमेकम् ।।१०।।

दुःखैकसार इति भीम इति प्रयत्नात् संसार एष किल यस्य बभूव हेयः ।
दिष्ट्या स एव परचिद्रससामरस्यसञ्जीवितः श्रयति तस्य विमुक्तिसाम्यम् ।।११।।

तृष्णाकरालकरवालविलुप्यमानं यद्विस्मृतात्मविभवं कृपणं बभूव ।
उच्चैरकिञ्चनतयापि तदद्य चेतस्स्वात्मावमर्शपरहर्षमुदारमास्ते ।।१२।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कस्योर्जितस्य सुकृतस्य फलं यदेतत्पुण्योदयस्तव कुतोऽयमनन्यलभ्यः ।
संविच्छ्रिया गलितभेदविकल्पया यदेकं मुहूर्तमपि नैव विमुच्यसे त्वम् ।।१३।।

वर्तामहे क्वचन नाम न चित्त दिष्ट्या वर्धामहे वयमहो मुदिता भवामः ।
यत्त्वां सखे परनिरुत्तरशैवसम्पत्सम्भागमन्थरतरं परिलोकयामः ।।१४।।

ध्यानेऽर्चनेऽपि न कदाचन कांचनापि कुत्रापि निर्वृतिदशां वत यन्न लेभे ।
दिष्ट्या निमग्नमपि संव्यवहारमध्ये चेतस्तदद्य न विमुञ्चति पारिपूर्ण्यम् ।।१५।।

सर्वेषु चित्तमधुपो विषयद्रुमेषु बभ्राम यस्सततमस्तमिताभिलाषः ।
दैवादवाप्य परमेश्वरपारिजातं तृप्तो विलीन इव मुञ्चति चञ्चलत्वम् ।।१६।।

यैरिन्द्रियैरसि वशीकृतशक्ति चेतः पूर्वं कदर्थितमभू रहितैरिवोच्चैः ।
स्वच्छानिकेतपरचिद्रससंविभक्तैर्दिष्ट्याद्य तैरनुचरैरिव राजसे त्वम् ।।१७।।

चिन्तां ततान करुणं प्रललाप पूर्वं यत्सङ्कुचत्स्थितिभयं रविजाद्विचार्य ।
चेतस्तदद्वयमिदं निजरूपमीक्ष्य दिष्ट्याद्य निर्भयममन्दमुदात्तमास्ते ।।१८।।

नित्यं यदेतदभवद्विफलप्रयासं हेवाकदुर्ललितमप्रथितात्मभावम् ।
संवित्सुधारसचमत्कृतिघूर्णमानं दिष्ट्या तदद्य नितरां स्पृहणीयमास्ते ।।१९।।

चिन्ताशताकुलतरं न रतिं कदाचिद्व्रीतं भवादभजतैकमपि क्षणं यत् ।
चेतश्चिदात्मकमिदं सकलं विलोक्य सुप्तप्रबुद्धमिव निर्वृतरूपमास्ते ।।२०।।

बन्दामहे किमु नुमः किमु गौरवेण हर्षेण चित्त किमु नाम न पीडयामः ।
संप्राप्तदुर्लभमहोदयशैवसम्पत् त्वां कौतुकेन किमु मित्र विलोकयामः ।।२१।।

आपृच्छ्यतामियमनादिघनप्रबन्धस्नेहानुविद्धहृदयाद्य माया ।
संसेव्यतां सुभग शैवपदप्रवेशसम्प्राप्तदुर्लभमहोदयमोक्षलक्ष्मीः ।।२२।।

किं ब्रूमहेऽत्रभवते सुकृतेन मन्ये सर्वाशिषामविषये ननु वर्तसे त्वम् ।
यत्कारणाधिगतनिर्मलनिर्विकल्पस्वच्छन्दशङ्करपदे भजसेऽनुरागम् ।।२३।।

चित्रं तदेतदसमं यदभूत् सुखेषु प्राप्तेष्वनिर्वृतिदशामनुवर्तमानम् ।
दुःखेषु दुस्सहतरेष्वपि चित्तमद्य पूर्णप्रमोदरसनिर्भरमेतदास्ते ।।२४।।

विश्वं निगीर्य सहसा कवलं विधाय कालं प्रशान्तगगनोपम दिव्यमूर्तिः ।
या राजते निरुपमामृतपूरपूर्णा सा कापि खेचरगतिर्जयति त्वदीया ।।२५।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ते कारणाधिपतयः प्रलयं प्रयान्ति यास्मिन्महावटतटे विषमे गभीरे ।
शक्तिर्निजं वपुरपि प्रसभं जुहोति तद्धाम संश्रयसि वीरवर त्वमेकम् ।। २६ ।।

विद्युद्विलासचपले विभवे नताङ्गी भ्रूभङ्गभङ्गुरतरेऽपि च जीवितेऽस्मिन् ।
चित्त त्वयैव विजितं श्रयताऽविनाशि दिग्देशकालकलनारहितं पदं तत् ।। २७ ।।

स्वस्त्यस्तु तेऽस्वरविकस्वरसम्प्रदायसम्प्राप्तशाम्भवपदोदितसम्पदाय ।
दुर्वारसंसृतिदशास्वपिनिर्विकार नित्योदितात्मविभवाय भवाभवाय ।। २८ ।।

स्वच्छन्दनिर्मलसदोदितनिर्निकेतसंवित्सुधारसचमत्कृतिनिर्भरोऽस्मि ।
दिष्ट्याद्य सद्गुरुमुखाम्बुजमध्यलब्धानुच्चार्य चारुकथनोदयविस्मितोऽस्मि ।। २९ ।।

भवमरुभुवि श्रान्तो मोहाद् य एष मनोऽध्वगो
विषमविषयप्रोद्यत्तृष्णानिवेशवशीकृतः ।।
शिवपदसुधासिन्धुं दैवादव्याप्य स सादरं
किमपि सुखितो मज्जं मज्जं निमज्जति साम्प्रतम् ।। ३० ।।

निरावरणचिद्व्योमपरमामृतनिर्भरः ।
नागाभिधानस्तदिदं चित्तसन्तोषकं व्यधात् ।। ३१ ।।

।। समाप्ता चित्तसन्तोषत्रिंशिका ।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

भास्करकण्ठस्य

वाचिकनमस्कारः शिवस्तुतिरूपः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

वाचिकनमस्कारः शिवस्तुतिरूपः

ॐअथ वाचा नमस्कारः स्तुतिरूपो विविच्यते ।
विस्तरेण यतः सोऽयं बहुभेदो निगद्यते ।।१।।

वाचा कृतो नमस्कारो वाचिकोऽयं प्रकीर्तितः ।
वागियं च चतूरूपा पण्डितैः समुदाहृता ।।२।।

प्रथमा स्यात् परारूपा पश्यन्तीत्यपरा स्मृता ।
तृतीया मध्यमा प्रोक्ता चतुर्थी वैखरीरिता ।।३।।

प्रकाशस्य विमर्शाख्या या स्वरूपतया स्थिता ।
शक्तिः सेयं परा वाक् स्यादहमामर्शरूपिणी ।।४।।

तया वाचा प्रकाशोऽसौ स्वात्मानं ह्यहमित्यलम् ।
परामृशति तस्मात् सा वक्ति तं चितिरूपिणम् ।।५।।

परामृष्टा भासकश्च शक्तितद्वत्त्वभावतः ।
एक एवास्ति भेदस्तु चित्राश्वगजवत् स्थितः ।।६।।

असौ यद्भासयेत् तस्य परामर्शनतत्परा ।
एषेति भेदः कोऽस्त्यत्र विषयेण समाहितः ।।७।।

यदेव भासनं प्रोक्तं तदेवामर्शनं विदुः ।
यो भेदः सोऽपि तन्मात्रमिति का भेदकल्पना ।।८।।

यः शिवः सैव शक्तिः स्यादामर्शो भासनं तथा ।
महाद्वैतेऽत्र को भेदो भेदस्यापि तथात्वतः ।।९।।

तथापि भेदो भात्येव चतुष्टयगतस्तु यः ।
सोऽपि तस्यैव सा शक्तिर्या विवादपदे स्थिता ।।१०।।

न च शक्तेर्न योगस्यावकाशो भवति स्फुटम् ।
अग्निः कस्माच्च दहति काष्ठादि ब्रूहि तत्त्वतः ।।११।।

शक्तत्वं चात्र भावेन कल्प्यते नान्यतः क्वचित् ।
भानमात्रस्य साम्राज्यं यत् सर्वत्र स्थितिं गतम् ।।१२।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अभातेऽपि च तस्यैव स्फूर्तिः सद्भिरुदाहृता ।
नऽर्थस्यापि भानं हि विना सत्तां न विद्यते ।।१३।।

यद् भाति तस्य शक्यत्वं शक्तित्वं वाऽथ कथ्यताम् ।
शक्यशक्त्योर्न भेदोऽस्ति शक्तिमल्लिङ्गयोर्यतः ।।१४।।

सेयं तस्मात् परा वाणी शक्तिमात्रस्वरूपिणी ।
सर्वदा शिवमाश्रित्य प्रकाशाख्यं स्थिता भवेत् ।।१५।।

न प्रकाशं विना कश्चित् साऽस्ति सोऽपि तया विना ।
न जानीमस्तयोः केन निर्मितियं व्यवस्थितिः ।।१६।।

अर्थस्य शब्द एवार्थः शब्दार्थोऽप्यर्थ इत्यलम् ।
एतेन सिद्धं शब्दार्थगतमैक्यं बहिः स्थितम् ।।१७।।

तदैक्यमेव सिद्धं स्यात् तयोर्न व्यस्तता क्वचित् ।
सा तु भाता तदैक्यस्य शक्तिरेव न संशयः ।।१८।।

शिवोऽपि तस्माद् देवस्य शक्तिरेव बुधैः स्मृता ।
शक्तेस्तु तत्र का शङ्का तत्त्वे भावचयस्य च ।।१९।।

यच्छक्तिः शक्तभावेन स्फुरेत् स शक्त उच्यते ।
अन्ये तु शक्तिमात्रं स्युः शक्त्या वेति विनिश्चयः ।।२०।।

शक्तेऽपि शक्तिसंयोगे न शक्त्यन्तरमिष्यते ।
अग्नेः किं दाहकत्वेऽत्र दाहकत्वान्तरं भवेत् ।।२१।।

अनवस्थाऽपि या नासौ भवेद् दोषावहा स्फुटम् ।
अनन्ते यदनन्तत्वं शक्तीनामपि युक्तिमत् ।।२२।।

शिवाच्छक्तेस्ततश्चास्य न भेदो युक्तितो यथा ।
भावानामपि ताभ्यां स तेभ्यो वा नानयोस्तथा ।।२३।।

अभेदेऽपि विभेदोऽयं महाभेदः प्रकीर्तितः ।
स्थितो महानयेष्वेष नान्यशास्त्रेषु संस्थितः ।।२४।।

अहमामर्शरूपैवं प्रकाशाख्ये शिवे स्थिता ।
परावाक् संस्मृता शक्तिः सर्वदाऽऽलिङ्ग्य संस्थिता ।।२५।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सिद्धरूपा स्तुतिः सेयमहमामर्शरूपिणी ।
अनुपायनमस्कारनिर्णये कृतविस्तरा ।।२६।।

सर्वशक्तिमयत्वेऽपि चिदानन्दोभयात्मिका ।
शक्तिः सेयं समाख्याता प्राधान्येन मनीषिभिः ।।२७।।

निर्विकल्पकविज्ञानभावेनाथ स्फुरद्वपुः ।
पश्यन्ती सैव सम्प्रोक्ता पण्डितैस्तत्त्वदर्शिभिः ।।२८।।

अविभागा तु पश्यन्ती सर्वतः संहृतक्रमा ।
स्वरूपज्योतिरेवान्तः सूक्ष्मा वागनपायिनी ।।२९।।

इति न्यायेन सेयं स्यादविभागस्वरूपिणी ।
क्रमेण रहिता स्वान्तःप्रकाशैकस्वरूपिणी ।।३०।।

इच्छाशक्तिस्वरूपेयमान्तरामर्शभावतः ।
विकल्पाभावता त्वस्या अभावात् प्रतियोगिनः ।।३१।।

पश्यन्तीभाव एषोऽस्याः संविद्रूपतया स्थितेः ।
संविद्विज्ञानकर्तृत्वं भजत्येव न संशयः ।।३२।।

भाविपाषाणभावस्य जलस्य शीतता यथा ।
तथैवेयं दशा प्रोक्ता बोधस्य बोध्यताजुषः ।।३३।।

वाक्त्वं भवेत् परा पुष्टिभावतः परमार्थतः ।
अस्याः स्वरूपतो नैव परं मौनतया स्थितेः ।।३४।।

वाक्त्वेन स्तुतिभावोऽस्याः स्तुतिर्वाचा विमर्शनम् ।
सर्वोत्कृष्टतया प्रोक्तं यस्मात् सर्वैर्मनीषिभिः ।।३५।।

परापरशिवस्यास्य स्तौत्युत्कर्षं परात्परम् ।
पश्यन्तीति शिवस्यैषा परभावेन संस्थितम् ।।३६।।

स्तौतीति साध्यता येयं सा तत्त्वेन न युज्यते ।
यद्यप्येव तथाऽप्यत्र किं कुर्मो वाग् हि दोषभाक् ।।३७।।

उत्कर्षः सिद्ध एवात्र परामर्शश्च तद्विधः ।
शिष्यबोधनमात्रार्था कल्पना नात्र दोषकृत् ।।३८।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

उत्कर्षस्य परामर्शः पण्डितैः स्तुतिरुच्यते ।
स्तुत्ये स्थितस्य सत्येन श्लाघा सा त्वन्यथा भवेत् ।।३९।।

स्तोता स्तुत्यः स्वयं चासौ शिव एवात्र संस्थितः ।
स्तुतिभावेन सम्प्रोक्ता तच्छक्तिः परमेश्वरी ।।४०।।

पश्यन्ती सा ततो वर्णविभागेन स्फुरद्वपुः ।
मध्यमा प्रोच्यते तज्ज्ञैर्मध्यमत्वेन संस्थितेः ।।४१।।

पूर्वं हि वाक् स्वयं श्रेष्ठमुत्तरा त्वधमा स्फुटम् ।
वाग्भवेदिति सेयं तु मध्यमा संस्मृता बुधैः ।।४२।।

अवरोहेऽत्र संस्कारभावेऽपि शक्तिभावतः ।
तज्जैवेयं स्थिताऽऽरोहे तज्जैवं तु भृशं स्थिता ।।४३।।

विभागेनात्र संस्फूर्तिर्वर्णानां समुदाहृता ।
ज्ञानशक्तिस्वरूपेयं विकल्पज्ञानरूपिणी ।।४४।।

स्मृतिभावेन संस्थानाच्चित्ते सेयं कृतास्पदा ।
बाह्ये सोऽयं परामर्शो विकल्पत्वेन संस्थितः ।।४५।।

स्तुत्यस्यापि परामर्शः स्तुतिरेव न संशयः ।
सेयं मानसिकी प्रोक्ता स्तुतिः शास्त्रपरायणैः ।।४६।।

मध्यमा सा ततो देहात् निर्गच्छन्ती स्वभावतः ।
वैखरी प्रोच्यते देहो विखरो हि बुधैः स्मृतः ।।४७।।

स्थानानि करणान्यत्र प्रतिवर्णं विभेदतः ।
विभुनैव कृतान्येभ्यः सा वाक् स्फुटतया स्फुरेत् ।।४८।।

क्रियाशक्तिस्वरूपेयं स्थिताऽस्ति परमात्मनि ।
शिवाख्ये शक्तभावेन प्रसिद्धे चित्स्वरूपिणि ।।४९।।

अस्यास्तदनु सङ्केतो बुधैः पूर्वतरैः कृतः ।
अनेनेदमनेनेदं बोद्धव्यमिति सुस्फुटम् ।।५०।।

यद्यपि सर्वे शब्दाः स्युः सर्वार्थवाचकाः स्फुटम् ।
तथापि देशकालाभ्यां नियमस्तत्र संस्थितः ।।५१।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अव्यक्तध्वनिसार्थोऽयमेतद्भेदतया स्थितः ।
भवत्येव न तस्येह चर्चा काऽप्युपयोगिनी ।।५२।।

प्रकाशामर्शरूपत्वं परायाः परिकीर्तितम् ।
तदैक्यं स्यात् परशिवः परासंश्रितविग्रहः ।।५३।।

निर्विकल्पकबोधत्वं पश्यन्त्याः समुदाहृतम् ।
तार्किकाणां मते शाब्दी चर्चा तेभ्यो न रोचते ।।५४।।

मध्यमाया मनोमात्रे स्फुरन्त्याः स्मृतिगोचरे ।
सविकल्पकविज्ञानभावस्तेषां मते स्थितः ।।५५।।

पुंसामथाऽऽस्यकुहरान्निर्गच्छन्त्यास्तु तैः स्मृता ।
वैखर्याः शब्दरूपत्वं साक्षाच्छब्दतया स्थितेः ।।५६।।

परायास्तु कथा नात्र युक्ता स्याद्द्वैतशासने ।
पश्यन्त्या अपि यत्तेऽमी द्वैततामेव मन्वते ।।५७।।

वैयाकरणवृद्धैस्तु शब्दब्रह्मत्वकल्पना ।
पश्यन्त्यां तन्यते तत्र विश्रान्तेरित्यलं बहु ।।५८।।

अव्यक्तध्वनिरूपाऽत्र पश्यन्ती समुदाहृता ।
आसक्तिजननी तूर्णं माधुर्याश्छ्रोतृहृद्भुवि ।।५९।।

चर्मावनद्धशब्दोऽत्र मध्यमारूप इष्यते ।
व्यक्ताव्यक्ततयाऽऽसक्तिं लेशेन जनयेत् सदा ।।६०।।

स्फुटमुच्चारितो गीतशब्दस्तु पण्डितैः स्मृतः ।
वैखरीति सुव्यक्तत्वात् पारुष्येणैव संयुतः ।।६१।।

चतुर्विधा स्तुतिरियं संस्थिता परमात्मनः ।
आद्यं द्वयं तत्र सिद्धमुत्तरं साध्यतां गतम् ।।६२।।

तत्रापि वैखरीवाचा स्तुतिर्लोकेऽतिविश्रुता ।
ततः सेयं विभेदेन दर्श्यते प्रकृतत्वतः ।।६३।।

तत्रापि प्रथमं कार्या स्तुतिर्गुरुपदाब्जगा ।
गुरुपादप्रसादाद्धि परतत्त्वाप्तिजृम्भणा ।।६४।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ततः श्रीपरमेशस्य स्वात्मरूपस्य सा स्तुतिः ।
युक्ता स्यादिति सेयं च विस्तरेण प्रदर्श्यते ।।६५।।

मङ्गलश्लोकमाश्रित्य यथैव निर्णयः कृतः ।
विषयादेस्तथैवेयं स्तुतिश्च क्रियते स्फुटम् ।।६६।।

विषयादिस्वरूपेण भगवानेव यत् स्वयम् ।
स्फुरत्येष महाशक्तिस्तत्स्तुतिस्तत्रगा स्मृता ।।६७।।

भूमौ स्थितेऽपि पाषाणे पदं दत्तं ह्यसंशयम् ।
परमार्थेन भूनिष्ठं न पाषाणगतं स्मृतम् ।।६८।।

केवलं निर्विकल्पेन सविकल्पेन वा स्तुतः ।
रूपेण भगवान् नैव स्तुतः स्यादिति मे मतिः ।।६९।।

या स्तुतिः सर्वभावेन बुधैः सा स्तुतिरुच्यते ।
सर्वगस्य शिवस्यास्य सर्वरूपतया सदा ।।७०।।

द्वैते स्तुतिरियं युक्ताऽद्वैतेऽयुक्ता स्फुटं स्थिता ।
पराद्वैते युक्ततरा सेयं सद्भिरुदाहृता ।।७१।।

तन्महाद्वैतमाश्रित्य करिष्ये स्तुतिमुत्तमाम् ।
न योग्या चोद्यजालस्य भवेदेषा ततः स्फुटम् ।।७२।।

अन्यथा स्तौति कं कोऽत्र केनेति चोद्यचञ्चुभिः ।
स्फुटीकृताच्चोद्यदृशाच्च्यावयन्ति ततः पदात् ।।७३।।

पराद्वये तु ताः सद्यस्तद्भावेनैव भाविताः ।
पूर्णतामेव तां कुर्युरिति का चोद्यभावना ।।७४।।

मा कुर्वन्त्वथवाऽथाऽपि मा तथैव स्थिता स्वयम् ।
न न्यूनाधिकभावस्य पदं परशिवात्मिका ।।७५।।

अज्ञानमात्रसाराऽस्तु स्तुतिर्वेयं तथापि न ।
हानिर्मलं मलेनैव क्षालयन्ति विचक्षणाः ।।७६।।

तदज्ञानदशायां च पूर्णतायां च युक्तताम् ।
स्तुतिर्भजति मध्ये तु यथा भाति तथाऽस्तु वा ।।७७।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

पूर्वस्यां तु दशायां सा मलं दूरे करिष्यति ।
द्वितीयस्यां विनोदस्य हेतुतां याति सुस्फुटम् ।।७८।।

अविनोदो विनोदश्च यद्यप्येव समौ मतौ ।
तथाप्येव विनोदोऽस्तु लोकेऽत्र युक्ततावशात् ।।७९।।

अयुक्तमपि युक्तं वा भवत्येव तथापि वा ।
युक्तमेवास्तु लोकेऽत्र परं व्यवहृतेः पदम् ।।८०।।

तदप्यकस्मात् सम्पन्नं यदि तत्रापि शोकिता ।
केयं परशिवेनैव शोचनं युक्तिमद् बहु ।।८१।।

लोके सिद्धं तु युक्तस्य सेवनं सर्वदैव यत् ।
तद् यत्नेनाहृतिर्नास्य सेतरस्य स्फुटं स्थिता ।।८२।।

स्तुतिर्युक्ततरा लोके सर्वोत्कृष्टे यतस्ततः ।
वाङ्नाम स्तुतिरूपा सा दर्श्यते सिद्धये नृणाम् ।।८३।।

ॐ श्रीगुरवे नमः ।

प्रकाशरूपां ननु दक्षिणस्थां विमर्शरूपामथ वामगां च ।
द्वे पादुके स्तौमि गुरोः शिवस्य परस्य मूर्तिं दययाश्रितस्य ।।८४।।

प्रकाशसंलीनविमर्शरूपां तत्सामरस्येन विभातसत्ताम् ।
परां श्रये चेतसि पादुकां श्रीगुरोरहं पूर्णतयाऽऽश्रितस्य ।।८५।।

विमर्शनात् सद्य इहैकतोऽमी यस्या जना दर्शनमाप्नुवन्ति ।
शिवस्य शक्तेरपि देवतां तां स्वां नौम्यहं श्रीगुरुपादुकाख्याम् ।।८६।।

शिवोऽस्ति कोऽन्यो गुरुरेव सोऽयं देहं श्रितो यद्दयया जनस्य ।
जनोऽपि कोऽयं ननु वाऽस्ति सोऽयं शिवो गुरुः सर्वतया स्थितो यत् ।।८७।।

शिवो गुरुर्वाऽस्ति गुरुः शिवो वा केयं कथा द्वैतहताऽथवाऽत्र ।
अद्वैतचर्चापि हि नात्र युक्ता द्वयाद् गते द्वैतविदूषिता यत् ।।८८।।

शिवं भजेऽहं गुरुमात्ररूपं गुरुं भजे सर्वतया स्थितं तु ।
शिवादिसर्वं खलु भावजातं भजेऽथवा श्रीगुरुभावतोऽहम् ।।८९।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

शिवो गुरुः सोऽहमिहास्मि सत्यं परं गुरुर्वा शिव एव वाऽस्मि ।
अस्मीव वाऽस्मीह विकल्पना तु त्रयस्य भेदेन विदूषिता का ।।९०।।

देहं श्रितोऽभूद् दयया शिवोऽसौ यन्मे स्वरूपं स्वमदर्शयत् सः ।
स्वतो विभिन्नं किल भावयित्वा सत्तोऽपि तद्रूपमहो न भिन्नम् ।।९१।।

गुरोः प्रसादेन यतोऽर्थमेतमवाप्नुवं तेन गुरोः सदा मे ।
पूज्यः परं नान्यतया स्थितोऽस्ति कोऽप्येव देवस्तमृतेऽथ पूज्यः ।।९२।।

पूज्यो गुरुः पूजक एष सोऽत्र पूजाप्यसौ सर्वतया स्थितो यत् ।
कोऽहं कमेनं परिपूजयामि कया न जाने किमिवात्र कुर्वे ।।९३।।

शान्तिर्गुरोः पादुकयोस्तु युक्ता प्रकाशनामर्शनयात् तयोस्तत् ।
स्वात्मैव यत् तद्द्वयरूप एष तत्र स्थितिर्मे खलु शान्तिरेषा ।।९४।।

बाह्ये प्रचारोऽपि च यः प्रवाहात् सापीह पूजा गुरुपादुकायाः ।
ब्रह्मादिकं सर्वमिदं जगद्धि गुरोः स्वरूपं न ततोऽन्यदेतत् ।।९५।।

रागोऽथवा द्वेष इहास्तु भावजाते विभेदोऽत्र न कोऽपि यस्मात् ।
पूजाद्वयं श्रीगुरुपादुकासु ततो विना नेह हि किञ्चिदेव ।।९६।।

नैर्मल्ययोगाच्छिव एव योऽभूद् वैदूर्यभावेन धृतात्मसत्तः ।
सोऽयं परामात्माऽस्ति गुरुर्ममेह प्रकाशरूपोऽपि विमर्शसारः ।।९७।।

तस्यावतारोऽथ तु यः स्वरूपादभिन्नमूर्तिर्गुरुरत्र मे सः ।
आत्मा स्वयं भास्कर एष सोऽहं प्रकाशरूपो ननु काऽत्र चिन्ता ।।९८।।

गवां ततिः सेयमिहात्यनर्घा न्यस्ता मया या भुवि भास्करेण ।
गुरोः पदाब्जेषु सतां हृदब्जान्येवैतया यान्तु विकासकाष्ठाम् ।।९९।।

ॐनमः शिवायास्तु सदा स्वभूतेरास्वादनार्थं विषयत्वमीयुषे ।
नानात्वजुष्टान्तरबाह्यचेत्यभावेऽपि सर्वान्तरचित्स्वरूपिणे ।।१००।।

गृहीतनानाविधदेहमातृभावाय जाग्रत्पदतामुपेयुषे ।
आस्वादनार्थं निजबाह्यभूतेर्बाह्येन्द्रियाधिष्ठितमूर्तये नमः ।।१०१।।

अथान्तरास्वादविशेषलब्ध्यै सर्वावसानामपि साधनाय च ।
गृहीतनानाविधबुद्धिमातृभावाय ते स्वप्नजुषे नमो नमः ।।१०२।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

मातृद्वयस्यास्य बलैकहेतोस्तं प्राणभावं भजते स्वयंभुवे ।
सवेद्यसंसुप्तिविभूषिताय सुखैकमग्नाय च ते नमो नमः ।।१०३।।

प्राणावकाशार्थमथो गृहीतस्वाकाशभावाय विभूतियोगात् ।
शून्याख्यमात्रे गतवेद्यसुप्तिपदाश्रितायापि च ते नमोऽस्तु ।।१०४।।

साक्षित्वमाधातुमथो गृहीतचिन्मात्रभावाय तु चित्त्वयोगात् ।
शून्याख्यमेये खलु तुर्यधाम्ने सत्यप्रमात्रे भवते नमोऽस्तु ।।१०५।।

स्वाधःकृतं यद्विषयादिजातं स्वान्तर्गतं भावयते नमोऽस्तु ।
तेषां तलं व्याप्य तु वैभवेन पृष्ठं तथान्तात् परितः समस्तात् ।।१०६।।

आरोहलीलां भजते सदैवं तथावरोहं निजवैभवेन ।
पदाच्छिवाख्यात् परमाद्रसाग्निसंख्यातिगात् क्रीडक ते नमोऽस्तु ।।१०७।।

व्याप्येन हीनां निजदेहगां तां व्याप्तिं निजां पूरयितुं क्षणेन ।
शिवादिरूपैरनु तत्त्वपूगैस्तत्त्वेन भाताय च ते नमोऽस्तु ।।१०८।।

स्वभित्तिभूते परमेश दैवोद्याने स्वशक्त्या सह लीलयैव ।
अत्यन्तमास्वादवशात्तदैक्यं गताय नित्यं भवते नमोऽस्तु ।।१०९।।

शक्त्याऽथ शक्यैः सह सामरस्यं गतं स्वमात्मानममुं विभक्तम् ।
समस्ततत्त्वोपरिवर्तिनं ते क्रीडाविनोदं भजते नमोऽस्तु ।।११०।।

शक्त्याावियुक्तं निजमेव रूपं प्राधान्ययोगाय तु कुर्वतेऽथ ।
प्रकाशरूपं शिवतत्त्वमेतत् प्रकाशयित्रे भवते नमोऽस्तु ।।१११।।

सहैक्ययोगाय तु तां स्वशक्तिं विमर्शरूपां निजदेहलेशात् ।
भिन्नीकृतां भासयतेऽथ शक्तितत्त्वस्य भावेन च ते नमोऽस्तु ।।११२।।

तत्त्वद्वयेऽस्मिन् शिवरूपमेव मातारमादिश्य तु साक्षिभावे ।
स्वलेशभूतं स्वविनोदलीलारताय देवाय नमोस्तु तुभ्यम् ।।११३।।

सन्मात्रभावाश्रितसत्यभूतसादाख्यभावेन निमेषरूपम् ।
अन्तःपदाहंमितिमात्रसारं सादाख्यतत्त्वं शरणं प्रपद्ये ।।११४।।

तत्तेऽत्र साक्ष्ये विनियोज्य मन्त्रमहेशवृन्दं निजमूर्तिलेशम् ।
शक्त्या स्वया क्रीडनतत्परं त्वां स्वात्मानमीशं शरणं प्रपद्ये ।।११५।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अहं ममेदं प्रमयोः समत्वादुन्मेषरूपं बहिरेतदाद्यम् ।
तथाप्यभेदैकमयं त्वदीयं सदेश्वरं तत्त्वमहं प्रपद्ये ।।११६।।

मन्त्रेशवृन्दं विनिधाय साक्ष्ये स्वरूपभूतं निजमेव सम्यक् ।
शक्त्या स्वया क्रीडति यस्तमेतं विभुं प्रपन्नोऽस्मि महेशमाद्यम् ।।११७।।

इदं प्रमासारतया प्रसिद्धमभेदपर्यन्ततया स्थितं च ।
अभेदभेदाश्रितसख्यमेतद् विद्याख्यतत्त्वं तव देव वन्दे ।।११८।।

कृत्वाऽत्र साक्ष्ये ननु मन्त्रवृन्दमिदन्तयाऽहंमितिमिश्रयालम् ।
भावग्रहे सक्तमथो स्वशक्त्या क्रीडारसं ते भजते नमोऽस्तु ।।११९।।

स्वरूपविस्मारणहेतुभूतं तमःस्वरूपं वृतिमात्रहेतुम् ।
अभेदभेदान्तरसेतुभूतं मायाख्यतत्त्वं शरणं व्रजामि ।।१२०।।

ज्ञानाकलांस्तत्र निधाय साक्ष्ये भेदाद् गतान् भेदमनाश्रितांश्च ।
यः क्रीडतेऽस्यां स्वविहारभूमौ तथैव तं देवमहं प्रपद्ये ।।१२१।।

कर्तृत्वभूतेः खलु लेशभूतं किञ्चित्करत्वेन समर्थितं च ।
कलाख्यमेतद् भगवंस्त्वदीयं तत्त्वं श्रये ज्ञानकलाप्तयेऽहम् ।।१२२।।

सर्वज्ञताभागतया प्रसिद्धं किञ्चिज्ज्ञतारूपमणौ स्थितं तत् ।
अशुद्धविद्याख्यमिदं तु तत्त्वं भवत्स्वरूपं भगवन्नमामि ।।१२३।।

नित्यं क्रियाया निजदेहगाया वैचित्र्यरूपं परमेश ते तत् ।
सूर्यादिसञ्चारवशेन लक्ष्यं कालाख्यतत्त्वं शरणं प्रपद्ये ।।१२४।।

आसक्तिहेतुं ननु यत्र तत्र जीवस्य तस्याणुतया स्थितस्य ।
रागाख्यया सर्वजने प्रसिद्धं तत्त्वं तदेतच्छरणं व्रजामि ।।१२५।।

कलादिभूम्यन्ततया स्थितेऽस्मिन् नियामकं तत्त्वगणे यदेव ।
शक्तिस्वरूपं खलु तत्त्वमेतद् भजे सदा सत्पथप्राप्तयेऽहम् ।।१२६।।

मायादिशङ्कावृतमन्तरेतद् बाह्ये वृतं तत्त्वगणेन तद्वत् ।
प्रधानमुख्येन तु चित्स्वरूपं भजेऽणुसंज्ञं खलु तत्त्वमाद्यम् ।।१२७।।

सत्त्वादिसाम्यैकमयं प्रधानं सर्वत्र भाविन्यथ तत्त्वजाते ।
प्रकृत्यभावात्तु तदेकरूपं यत्तत्त्वमेतच्छरणं प्रपद्ये ।।१२८।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सर्वावसाहेतुतया प्रसिद्धं चिच्छायया चेतनवद्विभातम् ।
तत्त्वं तदेतन्महदाख्यमन्तर्महावसायाप्तिकरं भजामि ।।१२९।।

सर्वाभिमानैकविरोधहेतुर्देहादिनिष्ठाहमिति स्वरूपम् ।
तत्त्वं त्वहङ्कारतया प्रसिद्धं शिव त्वदीयं सततं नमामि ।।१३०।।

बाह्यार्थसङ्कल्पविधानदक्षं तदेकरूपं परमार्थसारम् ।
बाह्येन्द्रियाधिष्ठितकर्तृभूतं चित्ते मनस्तत्त्वमुपास्महे तत् ।।१३१।।

आकाशसारस्य तु शब्दसंज्ञायुक्तस्य बोधं कुरुते यदेतत् ।
अर्थस्य तत्तत्त्वमहं प्रसिद्धं श्रोत्राख्यया चित्तपदे स्मरामि ।।१३२।।

सारस्य वायोरनुबोधकं यत् स्पर्शाख्यया ख्यातियुतस्य लोके ।
अर्थस्य तत्त्वं ननु तद्भजेऽहं त्वगिन्द्रियाख्यं शिव ते स्वरूपम् ।।१३३।।

यस्तेजसः सार इह प्रसिद्धो रूपाख्यया सर्वजनेष्वजस्त्रम् ।
तत्सिद्धिहेतुं ननु संश्रयेऽहं नेत्राख्यमेतद् हृदयेऽत्र तत्त्वम् ।।१३४।।

जलस्य सारो रससंज्ञको यः स सिद्धिमायाति तु यस्य भित्तौ ।
तत्तत्त्वमेतद् रसनाख्ययात्तं भजे महास्वादविभूतयेऽहम् ।।१३५।।

भूमेस्तु सारो ननु गन्धनामा प्रकाशते यद् भुवि सर्वदाऽयम् ।
घ्राणाख्यया सर्वजने प्रसिद्धं तत्त्वं तदेतच्छरणं श्रयामि ।।१३६।।

वागाख्यकार्यस्य निबन्धनं स्यात् स्वेनैव यत्प्राणबलस्वरूपम् ।
वागिन्द्रियाख्यं तदहं प्रपद्ये तत्त्वं शिवस्यैव निजं स्वरूपम् ।।१३७।।

आदानमेतद् व्यवहारहेतोः करोति यद् भावकदम्बकेषु ।
तत् पाणिरूपं शरणं प्रपद्ये तत्त्वं स्वरूपं परमेश्वरस्य ।।१३८।।

गमिक्रिया यच्छरणा सदैव तत्तत्प्रदेशाप्तिकरी नराणाम् ।
पादाख्यतत्त्वं तदहं प्रपद्ये विभोः स्वरूपं ननु तत्पदाप्त्यै ।।१३९।।

देहस्य यत् सर्वमलापहारं करोति संशुद्धिकरं सदैव ।
तत् पायुरूपं शरणं प्रपद्ये तत्त्वं महार्घं परमेश्वरस्य ।।१४०।।

आनन्दप्रादुर्भवकारणं यत् स्पर्शं द्वितीयेन निजेन सद्यः ।
संप्राप्य निष्ठां मिथुने गतं तदुपस्थतत्त्वं शरणं प्रपद्ये ।।१४१।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

श्रुत्याख्यरूपेण तु मातृवर्गे हर्षप्रदं वर्णमयेन चाथ ।
सङ्केतयोगेन समस्तवाचि शब्दाख्यतत्त्वं शरणं व्रजामि ।।१४२।।

प्रमातृदेहे स्फुरणात् स्वकीयाद्रोमाञ्चभेदं जनयेत् क्षणाद् यत्।
तत् तत्त्वमेतच्च भजे सदाऽहं स्पर्शाख्यया सर्वजने प्रसिद्धम् ।।१४३।।

नेत्राख्यरन्ध्रेण तु मातृचित्ते प्रविश्य हर्षं जनयेत् सदा यत् ।
तत् तत्त्वमेतन्ननु रूपसंज्ञं भजे सदा द्योतितसर्वभावम् ।।१४४।।

आस्वादरूपः परमोऽस्ति योऽयं माधुर्यदेहो जलगोऽतिमिष्टः ।
अम्लादिभावेन गृहीतभेदस्तत्त्वं रसाख्यं शरणं श्रये तत् ।।१४५।।

प्रमातृदेहं ननु वासितं य आविश्य सम्पादयतीह सद्यः ।
हृद्गन्धरूपं शरणं प्रपद्ये विभोः स्वरूपं ननु तत्त्वसारम् ।।१४६।।

सारप्रदं शब्दमपीह सद्यो गुणीकरोतीव महत्तया यत् ।
शब्दस्य चाधारतया स्थितं तदाकाशतत्त्वं शरणं व्रजामि ।।१४७।।

सारप्रदं स्पर्शमपीह सद्यो गुणीकरोतीव महत्तया यत् ।
स्पर्शस्य चाधारतया स्थितं तद्वाय्वाख्य शरणं व्रजामि ।।१४८।।

सारप्रदं रूपमपीह सद्यो गुणीकरोतीव महत्तया यत् ।
रूपे तदाधारतया प्रसिद्धं तेजःस्वरूपं खलु तत्त्वमीडे ।।१४९।।

सारप्रदान् सर्वरसानपीह गुणीकरोतीव महत्तया यत् ।
तेषां तथाऽऽधारतया स्थितं तज्जलाख्यतत्त्वं शरणं व्रजामि ।।१५०।।

सारप्रदं गन्धमपीह सद्यो गुणीकरोतीव महत्तया यत् ।
गन्धस्य चाधारतया प्रसिद्धं तद् भूमित्त्वं शरणं व्रजामि ।।१५१।।

मातृद्वयं साक्षितया निवेश्य कलादिभूम्यन्ततया प्रसिद्धे ।
लयाकलाख्यं सकलं च तत्र यः क्रीडते तं हृदये भजेऽहम् ।।१५२।।

तां मन्त्रसोपानततिं स्वभित्तौ प्रसार्य यो वाचकताप्रसिद्धम् ।
तत्रावरोहं तनुते सदेहं मन्त्राध्वनिष्ठं शरणं प्रपद्ये ।।१५३।।

मन्त्रैकदेशैकमयीं स्वभित्तौ सोपानपङ्क्तिं प्रविसार्य तत्र ।
मात्रामयीं वाऽत्र तनोति यस्तां पदाध्वनिष्ठं विभुमेतमीडे ।।१५४।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ततोऽथ सूक्ष्मां ननु वर्णपङ्क्तिं सोपानभूतां प्रविसार्य तत्र ।
द्वयीं य एतां कुरुते सदैव वर्णाध्वनिष्ठं प्रभुमेतमीडे ॥१५५॥

वाच्यस्वरूपां भुवनालिमेतां सोपानभावेन विसार्य तत्र ।
अत्रापि लीलां कुरुते द्विरूपां यस्तं भजेऽहं भुवनाध्वनिष्ठम् ॥१५६॥

शिवादिभूम्यन्ततया स्थितं च तत्त्वालिमुक्तां प्रविसार्य तद्वत् ।
तत्रापि लीलां भजते द्विधा यस्तत्त्वाध्वनिष्ठं विभुमेतमीडे ॥१५७॥

ततोऽध्वनां पञ्चकमेतदेव कृत्वा निवृत्त्यादिकपञ्चकान्तः ।
विभागतो यो रमते तथैव कलाध्वनिष्ठं विभुमेतमीडे ॥१५८॥

षडध्वसारे विषयादिशून्यपर्यन्तसोपानपथे विचित्राः ।
क्रीडास्तनोत्येव विभुः सदा यस्तं चित्रचेष्टं भगवन्तमीडे ॥१५९॥

अतीत्य सर्वाध्वततिं स्वरूपे शुद्धे स्थितं स्वस्थतया सदैव ।
चिन्मात्ररूपं परमात्मतत्त्वं नित्यं भजे चेतसि तत्क्षणेऽत्र ॥१६०॥

प्रादुर्भवं वेदचतुष्टयस्य स्वामर्शरूपस्य चकार यस्तम् ।
चतुर्मुखं श्रीपरमेशमीडे ब्रह्माख्यमेतं भगवत्स्वरूपम् ॥१६१॥

तच्छक्तिचक्रं सहजं करेण प्रत्येकमालम्ब्य तनोति यस्ताः ।
क्रीडाविभुस्तं शरणं प्रपद्ये श्रीवासुदेवाख्यमहं पुराणम् ॥१६२॥

सोमस्य सूर्यस्य च नेत्रभावं गतस्य मध्ये सहजं तृतीयम् ।
चिदग्निरूपं नयनं श्रयन्तं त्रिनेत्रमेतं शरणं प्रपद्ये ॥१६३॥

प्रमातृवृन्देन तु योऽपि मालां ज्ञानस्य देहे सहजां बिभर्ति ।
सहस्रनेत्रं तमहं प्रपद्ये प्रभुं महाश्चर्यकरं महान्तम् ॥१६४॥

अपानचन्द्रेण करोति पुष्टिं प्राणेन सूर्येण तु पाकमेव ।
ब्रह्माण्डदेहे ननु यस्तमेतं विराट्स्वरूपं भगवन्तमीडे ॥१६५॥

चिदादिकं यो निजशक्तिचक्रं पञ्चात्मकं स्वास्यतया बिभर्ति ।
ब्रह्मादिकं कारणपञ्चकं वा स्वच्छन्दनाथं तमहं प्रपद्ये ॥१६६॥

शान्तं स्वरूपं तव देव नौमि शान्तेतरं चाप्यथ घोरघोरम् ।
सर्वान् स्वरूपानथ सर्वतश्च नतोऽस्मि ते मोचनबन्धहेतून् ॥१६७॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

भूतात्मकं तन्मुखपञ्चकं यो बिभर्ति सर्वेन्द्रियपाणियुक्तः ।
गातुः सदा त्राणकरं च देवं तं नौम्यहं श्रीपरमेशमाद्यम् ।।१६८।।

कस्यापि सूर्यस्य तु धीमहीदं भर्गो वरेण्यं ननु देवमूर्तेः ।
धियस्तथा कर्मगणं महान्तं प्रचोदयाद् यो निजवैभवान्नः ।।१६९।।

पिण्डात्मकैर्बीजमयैश्च मन्त्रैः सर्वैः परं तं शिवनाथमाद्यम् ।
द्वारेण साक्षादपि वाच्यमानं विभुं प्रपद्ये शरणं महान्तम् ।।१७०।।

सर्वेषु भावेषु च सर्वदैव सर्वस्य भावेन गतं यदेतत् ।
बीजं यथा बीजतरौ सशाखि तत्सर्वबीजं शरणं प्रपद्ये ।।१७१।।

विश्वत्वमुत्तीर्णदशां तथैतन्मयत्वमासाद्य सदा स्थितो यः ।
त्रये त्रिधा चैव विराजमानं तं देवमाद्यं शरणं श्रयेऽहम् ।।१७२।।

पूर्णैः प्रपूर्णोऽपि च सर्वशून्यः शून्येन शून्यो भगवान् सदा यः ।
सर्वस्य शून्यस्य च सारभूतं विभुं प्रपन्नोऽस्मि सदा तमेकम् ।।१७३।।

परोक्षवादेन तु खिन्नचेताः प्रत्यक्षतां त्वय्यधिरोप्य देव ।
वच्मीव किञ्चिन्ननु मूढभावात् सर्वसहे सर्वदयानिधाने ।।१७४।।

शङ्काऽथ येयं मम का त्वमेव स्वे नास्यहं नास्मि तु किञ्चिदेव ।
ममाभिमानोऽपि तवैव भूतिरत्राभिमानेऽपि नु को वृथाऽयम् ।।१७५।।

करोमि यद् यत्त्वहमेतदत्र करोषि तत् त्वं खलु कोऽहमत्र ।
अस्म्येव यद्वा ननु कस्तदा त्वं मयि स्थिते द्वौ नहि युक्तिसिद्धौ ।।१७६।।

युष्मत्प्रयोगः खलु नैव युक्तस्त्वय्यस्ति भिन्नोऽसि हि नैव जातु ।
तस्याप्रयोगे ननु कोऽयमस्मत्प्रयोग एष प्रतियोगिसिद्धः ।।१७७।।

मौनं च नो युक्तमिहास्ति मौनान्मौनं च जाड्याश्रितसख्यमेतत् ।
यद् यत्करोम्येव करोषि वापि तत् तत्करोष्येव करोमि चाहम् ।।१७८।।

त्वया कृतं यन्मम तत्कृतं स्यान्मया कृते त्वत्कृतता स्फुटैव ।
तथापि हे त्वत्कृततैव चित्ते सर्वत्र भाताऽस्तु ममेश भक्त्या ।।१७९।।

भक्तिर्ममैषाऽपि च तेऽस्ति कार्यं करोमि किं नास्ति हि सापि मेऽत्र ।
अहं च नास्म्येव ममेह लोके भिन्नेषु कोऽयं मम भाति मानः ।।१८०।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अस्त्वेव सोऽप्यत्र तु नास्ति मेऽसौ कोऽप्येव दोषो मम नास्ति तत्र ।
नान्यस्य कार्येण हि कार्यवत्त्वं दृष्टं कदाचिज्जगतीह लेशात् ।।१८१।।

दोषेण चाप्यत्र नयेऽस्ति दोषो नास्म्येव यत्कोऽपि ऋते त्वयाऽहम् ।
तन्नासनं चापि ममास्ति नैव यदासनं तेन भवेद् द्विधाऽत्र ।।१८२।।

कार्यं ममैवास्त्वथवा समस्तं त्वयैव येनास्म्यहमत्र कोऽपि ।
लीनस्तरङ्गो जलमात्ररूपो जलस्य कार्येण हि कार्यवान् स्यात् ।।१८३।।

लयोऽस्त्ययं यस्त्वयि सैव सत्ता सत्ता स्वकीया ननु नष्टतैव ।
सत्तेति लीना सततं महान्तः स्थिताः पदे स्युस्तव चित्स्वरूपे ।।१८४।।

ममापि देवेश विलीनताऽस्तु सदैव शान्तेऽत्र भवत्स्वरूपे ।
समाधिकाले भवतैव सिद्धे व्युत्थानकालेऽपि भवत्प्रसादात् ।।१८५।।

पूर्णे स्वरूपेऽस्त्वथवा तवात्र निष्ठा ममैषा भवतैव दृब्धा ।
केयं च वा भेददशाऽस्ति युष्मच्छब्देन षष्ठ्यन्ततया निरुक्ता ।।१८६।।

यां यां दशां यामि तथा करोमि यद्यत्त्वया प्रेरित एष देव ।
सर्वेण तेनास्तु विभो स्वरूपलाभः परं मे ननु यस्य तस्य ।।१८७।।

स्वरूपलाभस्त्वथवाऽस्ति कोऽयं लब्धस्य लाभो नहि कोऽप्यपूर्वः ।
लब्धत्वमेतच्च न जातु युक्तं किं केन लभ्यं परमाद्वयेऽत्र ।।१८८।।

अलब्धिरेषापि तरां न युक्ता गन्थो यतः स्फूर्तिमथैति लेशात् ।
आस्वादरूपः कथमन्यथा स्याद् प्रेमात्मनिष्ठं सहजं सदान्तः ।।१८९।।

गन्थेन लब्धे तदहं त्वयीश विज्ञापयाम्येव विमूढभावात् ।
किञ्चित् तदेतत् कुरु कर्णदेशे शृणोष्यकर्णोऽप्यथवा दयातः ।।१९०।।

लग्नोऽस्म्यवान्तरदशासु विभो किमेतत्
विश्रान्तिरेव मम काचिदिहास्ति नैव ।
स्थानं परं यदि लभे भगवन्न ते तद्
हास्यं भवेत्किल महद् वद कस्य सत्यम् ।।१९१।।

शक्तोऽसि देव दयया च सदैव युक्तः
सर्वज्ञतां तव वदन्ति तथा महान्तः ।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

आर्तं निमग्नमिह मां विषयावटेषु
हित्वा समुद्धरति को भगवन् भवन्तम् ।।१९२।।

या त्वत्पदाप्तिविषया महती स्पृहा सा-
प्यस्त्येव ते परदृशा मम काऽत्र शक्तिः ।
सा चापि मेऽस्ति विषयेषु परं तवैव
रूपेषु किं मम मनः सततं दुनोषि ।।१९३।।

किं वा न रूपमिह ते विषयाः स्युरेते
किं वा दृगेव तिमिरेण हता ममाऽस्ति ।
स्वात्मीकुरुष्व विषयानथवा दृशं मे
नैर्मल्यमेव नय हा त्वरया हतोऽहम् ।।१९४।।

तापोऽस्ति मे यदि परं तव हर्षदोऽसौ
अस्त्वेव तद् बत वदामि किमेव नष्टः ।
नाशोऽपि मे यदि तवास्ति विनोदहेतु-
स्तल्लाभ एष परमो मम नो विनाशः ।।१९५।।

दासैः कथचिञ्चदपि यत् प्रभवः प्रसन्नाः
कार्या निजं पदमथो खलु ते दिशन्ति ।
तेभ्यः स्वयं हृदय ते किमिवास्ति चिन्ता
चिन्ताऽपि वाऽस्तु तव साऽपि विभोः प्रसादः ।।१९६।।

यत्किञ्चिदेव ननु चित्तपदे ममेश
स्फूर्तिं व्रजेत् खलु तथैव तदस्तु पूजा ।
बाह्योऽपि यद् भवति दैववशेन तेन
सैवास्तु केवलमियं त्वयि याचना मे ।।१९७।।

एतत् सदैव मम संस्फुरतात् प्रदेशे
चित्तस्य देव न तु कर्हिचिदेव लेशात् ।
वाङ्मात्रतस्तव भवेत् करणीयमेव
तत्तत्करिष्यसि कृतं मम चोदनाभिः ।।१९८।।

अत्रापि यद्यपि भवेदयमेव देव
न्यायस्तथापि मम याचनमेतदस्तु ।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

चित्तं स्वभावविभवे नयते जनस्य
वाञ्छाभिपूरिततरं भवतैव दृब्धम् ।।१९९।।

बालो यथा निजकरं दहने क्षिपन् स्वैः
पित्रादिभिर्वृतकरो बहु रोदितीह ।
तद्वत् तवेश चरितैः कृतरोदनाः स्मो
बालत्वमेव समवेक्ष्य दयां कुरुष्व ।।२००।।

बालत्वमेतदपि नस्तव कार्यमेव
नैवास्ति नः किमपि येन महाभिमानः ।
युक्तो भवेत् तदभिवीक्ष्य समस्तमेतद्
यद् योग्यमेव कुरु तत् स्वयमेव विज्ञः ।।२०१।।

किं चोदनाभिरफलं तु कृताभिराभिः
शक्ते दया परवशे भवतीश मौढ्यात् ।
दासस्य शक्तिरिह का प्रभुचोदनासु
जानाति यद्धितमयं कुरुते स्वयं तत् ।।२०२।।

कृतं दीनोक्ति कथनैर्लाघवावहताचणैः ।
प्रभोरुत्कर्षकथनान्नेयं वाग् विनिवर्तते ।।२०३।।

प्रभो किं त्वं स्वस्मिन् परिमितिविहीने परपदे
न मास्येवेदं यत् तदपरपदं यासि विवशः ।
अथो न्यूने स्वल्पे किमपरपदे स्फूर्तिरिह ते
न जाने किं स्थानं श्रयसि ननु तस्मादपि गतः ।।२०४।।

न ध्यानं वा नित्यं भवति च निजात् ते परपदात्
सदा सर्वत्रैव स्थितिरिव यतस्तेऽस्ति नियता ।
तदेतत् सर्वं स्यात् परपरतया भूषितमलं
महास्थानं त्वेकं कृतमिह परत्वादिकलनैः ।।२०५।।

तदेकत्वं किं वा भवति च भृशं भेदकलितं
द्वितीयं यत् तत्र स्फुरति नियमेनैव किमपि ।
द्वितीयं वा चैतत् स्फुरतु च ततो हानिरिव का
परत्वं तत्रालं रचयति तृतीयं परपदे ।।२०६।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

पदं त्वत्तो भिन्नं न भवति तवैतत् स्वयमतो
निजाधाराधेयो न भवसि ततो भेदगलनात् ।
यमाधारं वा ते कलयति जनो भेदनिरतः
स एवाधेयत्वं भजति भवतीशे ह नियतम् ।।२०७।।

समस्तं त्वय्येतत् त्वमपि च समस्ते भवसि यत्
न तेनाधारत्वं व्रजसि न च वाऽऽधेयकलनाम् ।
समस्तं त्वाधारो भवतु च तथाऽऽधेय इह वा
न भिन्नं त्वत्तस्तत् परमिति ततो धीः स्फुरति नः ।।२०८।।

तदन्वेषां कुर्मः कथमिव तवैतां स्थितवतो
न कुत्राप्येनालं कृतमथ तया भेदहतया ।
यदा यत्किञ्चिन्मे स्फुरति ननु यत्रैव नियतं
तदेतत् ते रूपं स्फुरति परचित्स्फारवपुषः ।।२०९।।

न देशः कालो वा भवति नियतः कोऽपि ननु ते
न चाकारं कञ्चिद् भजसि नियतं रूपरहितः ।
कदा कुत्रातस्त्वां किमिव कलयामीह तदियं
प्रतिज्ञा यत्किञ्चित् स्फुरति तदिदं त्वं चितिवपुः ।।२१०।।

भवद्भिन्नं किञ्चित् स्फुरति तु यदेतत् तव परं
विभूतेः प्राग्भारो भवति स यतस्तेऽस्ति वरता ।
स्वतो भिन्नानां यद् भिदिविषयताभावनमिदं
स्वतन्त्राणां युक्तं च न जगति भूतिर्भिदिपदम् ।।२११।।

अभेदो भेदो वा भवतु नियतः स्याद् द्वयमिदं
महापूर्णे भातं त्वयि परचितौ चेत्यभरिते ।
महोत्कर्षस्तत् ते परमिह परेषां तु यदसौ
त्वदैक्येनैवालं नहि बहु मनोऽप्यत्र निपुणम् ।।२१२।।

यदेवंरूपस्त्वं भवसि तु ममात्मा ननु ततो
नमाम्येव स्वात्मन्यपि परमुदा स्वन्तरहिते ।
श्रये तत् किं स्थानं नहि पृथगिहास्त्येव ननु यद्
भवत्तः स्वस्मात् तत् त्वयि मयि पदे शान्तिरुचिता ।।२१३।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

वदात्मंस्त्वं पूर्वं कथमिव तथाऽभूर्ननु कुतः
प्रयाता सा सत्ता तव परिगतेऽस्मिन् परपदे ।
भ्रमात् पूर्वं दृष्टा परिमिततयाऽद्यैव यदि वा
विभात्यन्यैवेयं वद वद विमोहोऽत्र मम यत् ।।२१४।।

अहो शान्ते रूपं किमिव परमं यत्र किमपि
विभात्येवात्माऽयं पर इह भवन् नैव ननु मे ।
अभातोऽलं सोऽयं भवतु मम यत् कोऽपि परमो
विभातस्तत्स्थाने परमिह स एवास्मि न परः ।।२१५।।

अशान्तिश्चाप्यास्तां किमिव कुरुतेऽसौ मम यतः
स्वतो भिन्नं किञ्चिद् त्रिजगति न भात्येव नियतम् ।
न तस्मात् तस्यालं भयमिह कदाचित् समुचितं
द्वितीयस्माद् यस्माद् भयमिह भवेद्धानिरिव का ।।२१६।।

स ईशो जीवोऽहं किमिति मम पूर्वं समभवद्
भ्रमो येनैनं त्वां परिमिततयाऽज्ञासिषमहम् ।
स ईशः सोऽहं स्यामिति परदशाऽहं स इति वा
विभेदः कोऽयं वाऽहमिति हि परं युक्तिकलितम् ।।२१७।।

अहं त्वं रूपे नो क्वचिदपि कदाचित् समुचिते
पदेऽवाच्ये तस्मिन् न कलिततरे वाचकगणैः ।
अहं त्वं कौ स्वस्तद् वद वद विभो मौनमिह हे
तवाप्यास्ते कोऽहं कथयितुमिदं युक्तिनिवहैः ।।२१८।।

अहं चिरेणास्म्यहमेश नाहं नाहं कदाचिन्ननु सत्यमेतत् ।
नाहं यदाप्यस्मि तदापि नाहं वेद्यत्वमायामि कदापि यत् त्वम् ।।२१९।।

त्वं चापि देवासि चिरेण मे त्वं जातोऽसि तत्त्वेन कदापि न त्वम् ।
न त्वं भवन् वापि कदापि तत्तां नो यासि यस्मादहमेव भासि ।।२२०।।

अहं त्वहं नैव तथा भवांस्त्वमावां यतोऽत्रैकतया स्थितौ स्वः ।
अस्मत्प्रयोगस्त्वथवा स एव द्वयोः प्रयोगे खलु शब्दशास्त्रे ।।२२१।।

इदं प्रयोगस्त्वथ तत्प्रयोगो मूढेषु तज्ज्ञेषु न तौ कदाचित् ।
यत्रास्ति न त्वंपदवाच्यताऽपि तत्रानयोः का भवतीह चर्चा ।।२२२।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

इदंतदोर्युष्मदि लीनता स्यात् तस्यास्मद्येषा ननु योग्यताभाक् ।
सहप्रयोगे खलु तत्र शब्दशास्त्रं प्रमाणं स्फुटमेव दृष्टम् ।।२२३।।

भावाः समस्तास्त्वयि लीनसारा अहंपदे त्वं च विलीनमूर्तिः ।
अहं च लीनः प्रतियोग्यभावात् कः स्तौति कं ब्रूहि महाद्वयेऽत्र ।।२२४।।

स्तुतिश्च का स्यान्ननु भावरूपा भावा गताः पूर्वतरं यतोऽमी ।
अविद्ययेयं स्तुतिरेवमेषाऽद्यापि स्थिता किं करवामहेऽत्र ।।२२५।।

सद्योऽस्तु वा सर्व इह प्रपञ्चो महादृशां हानिकरः किमेषः ।
स्तुत्याऽनया मूढजना विशुद्धिं चित्ते प्रयास्यन्ति न संशयोऽत्र ।।२२६।।

मध्यस्थितानां परमेव भेदवैमुख्यभाजां भवतीह लेशात् ।
हानिस्तथाप्येव महोपकारयुक्ता भवेयुर्ननु मूढलोकाः ।।२२७।।

मध्यस्थिताश्चैव निवृत्तिभाजः पदं गताः स्युर्निजयैव बुद्ध्या ।
का नोऽस्ति तेषां ननु देव चिन्ता सान्निध्यभाजां परमे पदे ते ।।२२८।।

दयानिधानैर्हि सदाऽनुकम्प्या मूढाः स्युरेते परमेव युक्त्या ।
तज्ज्ञाः स्वयं तत्पदलब्धियोग्या भवन्ति नो चेन्ननु ते त एव ।।२२९।।

मूढं स्वचित्तं विषयैकमग्नमुद्धर्तुमेषा परमा कृतेयम् ।
स्तुतिर्मया सर्वजनस्य चित्तं तयोपकारैकपदं सदा स्यात् ।।२३०।।

इत्याशंसां तु मे देव सफलीकर्तुमर्हसि ।
मायापदे हि भेदेन ग्रस्ते साऽपि च शोभते ।।२३१।।

भक्तश्च भक्तिश्च सदा त्वमेव त्वमेव सर्वैर्भजनीयरूपः ।
अस्त्येव तत्रापि च मेऽस्तु भक्तिस्त्वयीश नित्यं ननु तत्फलेयम् ।।२३२।।

भक्तत्वमेतद् भजनीयभावाच्छ्रेष्ठं बुधैः कीर्तितमेव प्राच्यैः ।
शिवोऽन्यथाऽयं स्वमुपासितुं नो यायात् प्रमातृत्वमुपासनार्हम् ।।२३३।।

मुक्तेर्भक्तिस्तथा श्रेष्ठा भवत्येव न संशयः ।
मुक्तेरास्वाद एको हि भक्तेर्नानाविधः स्थितः ।।२३४।।

अभक्तिरेवापि च याऽस्ति साऽपि भक्तिर्भवत्येव महेश्वरेऽत्र ।
अभक्तिमेतां किल लोक एष भक्त्यैव कुत्रापि कयाऽपि कुर्यात् ।।२३५।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

किञ्चात्ममात्रैकरतो जनोऽयं सर्वत्र नातत्किमपीह तस्य ।
सेव्यं ततः सर्व इहास्ति लोको भक्तः शिवस्यैककृतः प्रपञ्चैः ।।२३६।।

भक्तिस्तथा भक्तिरियं स्थिता स्याद् यस्याः सदान्तः खलुपूर्णरूपा ।
भवेन्महाभक्तिरियं तु कापि महात्मनां या भजनीयरूपा ।।२३७।।

भक्त्यैव योत्कृष्टतयाऽस्ति वाचा निर्दिष्टिराद्ये भजनीयभूते ।
सेयं स्तुतिः स्यान्नतिरेव वाच्या यस्या महार्घा फलतोऽथ साक्षात् ।।२३८।।

अन्योक्तवादो ननु योऽस्ति लोके रुद्राश्रुणो भूतिकथादिरूपः ।
रूपस्य सोऽयं ननु नात्र पक्षे यदस्त्यसौ चाणुतया प्रसिद्धः ।।२३९।।

कायेन पूर्वं नतिरत्र कार्या महेश्वरे स्वात्मतया प्रसिद्धे ।
स्तुतिस्ततो वाङ्नतिमात्ररूपा लयोऽथ तत्रैव च भावनीयः ।।२४०।।

ततो महाहङ्कृतिकर्तृभावरूपो नमस्कार इह प्रदिष्टः ।
रूढोऽत्र यः सोऽस्ति परात्परोऽयं शिवः किमन्यन्ननु वाच्यमत्र ।।२४१।।

विनार्थयोगं तु कृताऽपि सेयं स्तुतिर्विभुं हार्दयतीव सत्यम् ।
विनार्थयोगं हि शुकोदिता वाग् राज्ञां मनो रञ्जयतीह सम्यक् ।।२४२।।

वाचिकोऽयं नमस्कारः स्तुतिरूपो मया स्फुटम् ।
निर्णीतोऽत्र प्रकरणे चित्तशुद्धिविधायकः ।।२४३।।

इति श्रीमदाराध्यतमाचार्यवर्य-श्रीगुरुवरराजानकभास्करकण्ठविरचिते
चित्तानुबोधाख्ये महाशास्त्रे स्तुतिरूपवाचिकनमस्कारनिर्णायकं
सप्तमं प्रकरणं सम्पूर्णम् ।। इति शिवम् ।।७।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

योगिनः सहजानन्दस्य

परास्तुतिः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

परास्तुतिः

अभिनवपरिमलललितामेकत्रिंशन्महोत्पलग्रथिताम् ।
आषोडशान्तलम्बामालोक्यालोक्य विस्मये मालाम् ।।१।।

अहमिदमिदमहमहमेवेत्यहं प्रथा स्फूर्तिः ।
कस्यचिदपश्चिमजने जागर्त्यन्तर्निरन्तरोद्योतः ।।२।।

न बन्धो नो मोक्षो न खलु करणग्रामविसरो
न कार्यं नो कर्ता न च विधिनिषेधद्वयमपि ।
न हेयं नादेयं सततमुदितस्पन्दलहरी -
निमग्नोन्मग्नः सन् विहर हरसङ्कल्पमखिलम् ।।३।।

सौवर्णसम्पुटितमध्यभुवि प्रविष्ट
मुच्चाधराननिपीतविसृष्टिरूपम् ।
सारस्वतं किमपि यत्नमयत्नसिद्धं
जागर्ति यस्य हृदये जगतां स ईष्टे ।।४।।

या घोरादिभिरेतैः पारम्पर्यक्रमागतैर्नाथैः ।
प्रथयन्तीं विश्वमयीं विश्वातीतां स्वसंविदं नौमि ।।५।।

आनन्दशरणचरणां सकलङ्कशशाङ्कमण्डलच्छायाम् ।
तन्मण्डलाधिरूढां तत्कलया कलितचित्कलां नौमि ।।६।।

इच्छादिशक्तिमूलास्वजमूलां मूलकुण्डलिनीरूपाम् ।
नित्यामप्यणुरूपामणोश्च महतीं महीयसीं नौमि ।।७।।

मौक्तिकमणिगणरुचिरं शशाङ्कनिर्मोकसन्निभं क्षौमम् ।
विवसानां परमी(मे)शीं नमामि सौवर्णसम्पुटान्तस्थाम् ।।८।।

भक्तजनभेदभञ्जनचिन्मुद्राकलितदक्षपाणितलाम् ।
पूर्णाहन्ताकरणपुस्तकवर्येण रुचिरवामकराम् ।।९।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सृष्टिस्थितिहृतिकृद्भिर्नयनत्रितयैः शशीनदहनाख्यैः ।
मौक्तिकताटङ्काभ्यां मण्डितमुखमण्डलं परं नौमि ।।१०।।

षड्गति-षडूर्मि-षडरीनधरीकृत्य स्वभक्तवर्गस्य ।
कण्टकपञ्चकनोदनमण्डितसंवित्प्रकाशनीं नौमि ।।११।।

अध्वातीतं बुद्ध्वा बुधाः प्रबुद्धाः परं पदं यस्याः ।
कैवल्यं यान्ति हठात् कटाक्षपातेन तां परां नौमि ।।१२।।

यः पठतीदं स्तोत्रं पात्रं स भवेत्पञ्चवर्गस्य ।
गुरुचरणकरुणभाजा सहजानन्देन योगिनाऽभिहितम् ।।१३।।

।। इति परास्तुतिः ।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

साहिब्कौलानन्दनाथस्य

१. चित्स्फारसाराद्वयप्रबन्धः
२. शिवजीवदशकम्
३. सहजार्चनषष्टिका

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

चित्स्फारसाराद्वयप्रबन्धः

श्रीगुरुवरचरणकमलेभ्यो नमः

ॐकश्चिच्छिष्य उपेत्य दैशिकवरं संवित्स्वरूपं विभुं
पूर्णानन्दनिधिं प्रकाण्डमतुलं शम्भुं परस्थं परम् ।
दृष्ट्वा गर्भनिवासपूर्वकमलं दुःखव्रजं व्याकुलो
वाण्या गद्गदया चकार विनतो विज्ञप्तिमित्थं पुरः ।।१।।

श्रीनाथप्रवराः प्रपन्नवरदा भ्रष्टस्य तस्मात्पदात्
कोऽहं कस्त्वमथेतरश्च किमिदं को वेश्वरश्चेति मे ।
चिन्ताव्याकुलितस्य दीनमनसः क्षीणेन्द्रियस्य क्रमात्
त्यक्तस्पर्शमुखस्य खिन्नवपुषः कष्टा दशा श्रूयताम् ।।२।।

निद्रा नैति धृतिर्गलत्यथ मतिर्नष्टीभवन्ती गुणात्
स्वीयादस्ति विचारमित्रमनघं यातं च कुत्रापि सत् ।
यावद्यास्यति नो वपुर्यमलयं तावत्सुधाब्धिं परं
सच्चिद्धर्षनिधिं प्रकृष्टविभवं स्वात्मेश्वरं दर्शय ।।३।।

श्रुत्वान्तःकरणप्रसादसुधियः सत्साधनैः शोभिनः
स्वात्मान्वीक्षणसस्पृहस्य गदितं शिष्टस्य सद्दैशिकः ।
श्रीनाथाङ्घ्रियुगाब्जमद्भुतगतिं नत्वा परं निर्मलं
वाक्यं स्वानुभवादुवाच विदितस्वीयप्रकाशात्मवित् ।।४।।

दिष्ट्या ते मतिपद्मिनी सुविमला पङ्कात्स्वशक्त्योद्धृता
सिक्ता चापि विरक्तभावसलिलैः किञ्चित्परं मीलिता ।
यावन्मद्वचनप्रभाकरकरस्पर्शः किलास्या भवे-
देषा तावदलं विकासविभवं प्राप्नोति शश्वत् स्वयम् ।।५।।

एवं सा[न्त्व]नमस्य सत्यवचसा कृत्वा स्वतन्त्रात्मवित्
साहिब्कौलपदे स्थितः सति महामाहेश्वरः पश्चिमे ।
सच्छिष्यं व्यपदिश्य शान्तमनसं स्वात्मस्वरूपं परं
प्रोवाच प्रकृतं विमुक्तमतुलं चित्स्फारसाराद्वयम् ।।६।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

श्रोतव्यः श्रुतिसारवाक्यनिवहादश्रान्तमात्मा परो
मन्तव्यश्च दृढोपपत्तिभिरथ स्वातन्त्र्यहर्षर्धिमान् ।
ध्येयः सङ्गमपास्य शान्तमनसा नित्यं प्रकाशात्मकः
सर्वस्थस्य च विस्मृतस्य हि भवेत् तस्येत्थमीक्षा स्वतः ॥७॥

शम्भुर्नित्यविमुक्तबन्धविमलः सत्यः स्वतन्त्रोऽद्वयः
इत्यादौ श्रुतिसारतः सुसुखदः सम्यग्ग्य आकर्णितः ।
विश्वं तन्मयमेव तथ्यमखिलं भातीति सत्प्रत्ययान् -
मत्वा सोऽस्मि विचित्रशक्तिरिति तद् ध्यानात्परं प्राप्स्यसि॥८॥

जन्माद्यस्य यतो विलासवशतो वीचीततेर्वार्णवात्
तत्त्वं ब्रह्म सनातनं सुविमलं स्वच्छन्दमेकं परम् ।
निर्नामापरिमेयशक्तिविभवं सर्वत्र चाहन्तया
स्फूर्जत्स्वानुभवैकचर्यमखिलं सर्वप्रकाशात्मकम् ॥९॥

पूर्वं संप्रविलोकितेऽपि च पुनश्चैत्रेऽनु सन्धानतः
सोऽयं चैत्र इति प्रतीतिरचला यद्वद्भवेद्विस्मृते ।
सामानाधिकरण्यमुख्यविषयैर्विज्ञाय तद्वच्छिवं
तत्त्वं ब्रह्म निरामयं हि भयदा भ्रान्तिर्मुधा त्यज्यताम् ॥१०॥

नो देहोऽसि न चेन्द्रियं न च मनः प्राणो न वा नो पुमान्
न ज्ञानं क्षणिकं न शून्यमपि नो कर्ता न भोक्ता जडः ।
नानैकान्तिकभावतः सुखनिधिः सिद्धः सुषुप्तौ परे
सच्चिद्धर्षमयोऽसि कोऽपि विमलश्चिन्तां वृथा मा कृथाः ॥११॥

एताः कृत्रिमभूमिका नट इवास्थाय प्रभुः क्रीडसि
स्वच्छन्दः परमेश्वरो हतहतिः कालाद्यवच्छेदितुः ।
याभिः सर्वगतोऽपि सोऽप्यस इवानन्तप्रकाशः स्थितः
स्वं रूपं परिधाय सत्यविभवो न प्रत्यभिज्ञायसे ॥१२॥

न स्थूलोऽसि न सूक्ष्मतामुपगतो ह्रस्वो न दीर्घो न वा
नो शुक्लोऽपि न लोहितो न च हरित् कृष्णो न पीतो न वा ।
नीरूपोऽसि सरूपतां परशिवः प्राप्तो घटादित्यव-
न्निर्वर्णोऽपि सवर्णवज्जडजनैर्दृष्टो यथा सो हरित् ॥१३॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सङ्कोचो बहिरन्तरेऽपि च मुधा क्लेशप्रदस्त्यज्यतां
स्वाहन्ता परितः स्फुरत्सुखमयी न्यस्तेव चादीयताम् ।
देहादिष्वमलस्त्वमेव परमः स्वामी महाभैरवो
नान्यः कोऽप्यधिकस्त्वदस्ति स यतो भीतिर्मुधास्ते हते ।।१४।।

स्वप्ने वीक्ष्य यथा स्वकल्पनभवं नागं भवत्याकुलः ।
पर्यन्ते ललनाङ्गसङ्गमसुखं हित्वाश्रितं पूरुषः ।
तद्वत्त्वं स्वजनैर्भवादभिधया प्रख्यापितादन्यया ।
निर्द्वैतोऽपि विभीष्यसत्यममलः कस्माच्छिवो दीनवत् ।।१५।।

यद्वच्छाम्बरिकेन्द्रजालवितथभ्रान्तात्स्वचित्ताद्भवं
चाण्डालाद्यभयं व्यतीत्य लवणो भूयः पपालावनिम् ।
मायामात्ममतिं विहाय परमं तत्त्वं महाशान्तिदं
स्वामिंस्त्वं निजमद्भुतं स्मर विभुः सर्वोऽसि किं क्लिश्यसि ।।१६।।

संसारः परमार्थतोऽस्ति सकलो नित्यं वपुस्ते घनं
त्वं चाद्वैत इति प्रसिद्धिरचला सर्वत्र सिद्धिं गता ।
अद्वैताद्गलितैव चेतरकथा यस्ते प्रभोर्वन्दनं
कुर्यात् सो हि वृथाविमोहमनघो मुक्तोऽस्यदुःखो भव ।।१७।।

द्वित्वस्येव विधौ मराविव जलस्येवार्भके पुष्पिण-
श्छायायामिव यक्षकस्य च तथा रज्जाविवाहेर्भ्रमम् ।
मोपादेहि निजे परावरमये शान्तिस्वरूपे मुधा
संसारस्य यतस्त्वमेव परमः सत्तात्मना भाससे ।।१८।।

आदित्यातपयोः समुद्रजलयोर्जैवातृकज्योत्स्नयोः
सत्कर्तृक्रिययोश्च वस्तुगुणयोरङ्ग्यङ्गयोर्वा यथा ।
नास्ति त्वद्भवयोर्मनागपि तथा भेदो मुधा कष्टगं
सङ्कल्पं त्यज केवलं सकलगः सर्वोऽसि किं क्लिश्यसि ।।१९।।

बालो यद्वदुपेत्य मातुरभिधायात्मानमत्यद्भुतं
पृष्टे नाहमिहेति वक्ति भयदात्स्वीयात्प्रतिप्रत्ययान् ।
तद्वत्त्वं यदि सर्वगोऽपि विमलः स्वेच्छात जातिभ्रमं
नास्त्यत्राहमिति प्रतीतिमथ को नेतुं क्षमस्त्वां तथा ।।२०।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

यद्वद्गुप्तवपुर्वमन्नपि शमीवृक्षान्तरे पावकः
प्रत्यक्षो भवति प्रदीपितरुचिर्घर्षक्रियातः स्वयम् ।
तद्वत्तत्त्वविचारणात्परशिवः स्वान्तग्रहोत्थाद्विभु-
र्वीतत्वे विमले विभाति पिहितः सर्वस्थितोऽप्यद्भुतः ।।२१।।

बीजोप्तिः सिकतास्विव प्रवचनं यात्यत्र यद्वद्व्यर्थतां
विश्रान्तिं समुपैति बुद्धिरपि नो यद्वारिपूर्णं यथा ।
शास्त्रं यत्र च युज्यतेऽपि निखिलं घूके यथा वासर-
स्तत्त्वानुग्रहशक्तिरेव विमला त्वद्दर्शने कारणम् ।।२२।।

अप्येकोपवनी शिरःप्रभृतिभिर्नैकप्रतीकैर्यथा
विख्यातोऽत्र विभाति तद्वदमलः स्वच्छन्दकर्ता भवान् ।
नाकौकासुरमानवप्रभृतिभिः स्वैकः प्रकाशोऽपि सन्
नानाह्वाकृतिभिर्विभाति सुजडप्रज्ञेषु शक्त्या स्वया ।।२३।।

कम्पः सत्यनिलेऽनले सति तथा दाहो द्रवत्वं जले
सत्यद्रौ गरिमा सति प्रविमले ज्योत्स्नासतीन्दौ यथा ।
तद्वत्सत्यविचिन्त्यशक्तिविभवे त्वय्यात्मनि प्रस्खलद्-
भेदेऽप्याशु विजृम्भते स्वत इदं ब्रह्माण्डखण्डं महत् ।।२४।।

एकं चापि नदीजलं भवति निश्छाये कवोष्णं तटे
सच्छाये च सुशीतलं सततगान्दोलत्तरङ्गं यथा ।
संवृत्तो विविधात्म नास्ति सततानन्दैकरूपेऽपि सन्
स्वातन्त्र्यात् परमप्रकाशविशदात् तद्वद्भवानव्ययः ।।२५।।

सत्यानन्तविचारणे समुदिते स्वानुग्रहात् त्वं पुनः
सर्वत्राप्यतिसारसुन्दरमहास्वात्मात्मना लभ्यसे ।
हेमेवाङ्गदनूपुरादिषु जलं नानातरङ्गेष्विव
कुम्भादिष्विव मृत्तिका च विमलो मुक्तो विभुः केवलः ।।२६।।

ॐकारं पठितं विसंस्थुलरसः श्रुत्वा पिकेनार्भको
नो जानाति तदीयवर्तनमथो ह्यर्थस्य गन्धं कुतः ।
यं यं पश्यति वर्णमेव पुरतस्तं मन्यते तत्तया
सत्यज्ञैर्विवदत्यसत्यमखिलं ब्रूषेति यद्वन्मुहुः ।।२७।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

श्रुत्वा तद्वदसौ श्रुतेः परशिवाह्वानं स्थितिं वेत्ति नो
चाग्रस्थं वपुरादिमेव तनुते स्वाभासितं तत्तया ।
चार्वाकप्रभृतिर्विमोहितमतिस्तस्मिन्यतो नैव तत्
तस्य स्वानुभवैकगोचरमलं शान्तं सुखं दृश्यते ।।२८।।

वीच्यावर्तकफेनबुद्बुदतया यद्वद्भवत्यर्णवो
नानातामिव केवलोऽपि विलसत्पूर्णस्वरूपस्तथा ।
एकोऽप्यात्ममहेश्वरोऽयममलो देहादितां संश्रितः
स्वातन्त्र्यादतिचित्रशक्तिविभवो नानेव संलक्ष्यते ।।२९।।

आरात्पत्रफलप्रसूननिकराकारानुरूपाद्यथा
वृक्षे सावसुकाह्व इत्यवितथदृष्ट्या परिज्ञायते ।
ज्ञानेच्छादिविचित्रशक्तिविभवं केनायमीशस्तथा
स्वात्मा सर्वगतः स्वभावमधुरः संप्रत्यभिज्ञायते ।।३०।।

तर्कोक्तिः कणभुङ्मतं जिनपथः पातञ्जलं कापिलं
भाट्टानां सरणिश्च नास्तिककथेत्येतानि गायन्त्यपि ।
नानाशक्तिमणींस्तथापि न विदुः स्वातन्त्र्यसारं तव
यस्य स्वानुभवैकवेद्यमहिमामत्त्वं कथं रोदिषि ।।३१।।

चिद् गृह्णाति यदा विहारविधये सङ्कोचमात्मेच्छया
सेयं तर्ह्यभिधीयते घनवपुः स्फारेह चित्ताख्यया ।
तत्सङ्कल्पितयास्ति बन्धनमथो मुक्तिश्च सा दुस्त्यजा
लीना यस्य निजप्रसादबलतः सोऽयं चिदेवेश्वरः ।।३२।।

चित्ते संविदिते स्वभावमधुरे सर्वर्धिमत्तायुते
नो कार्यं न च कारणं न च कथा कर्तुर्निमित्तात्मनः ।
नो माता न मितिर्न मेयमपि तु स्वीयानुभूतिः स्फुटा
सद्धर्षः सहजो विकल्परहितः पूर्णः परः शिष्यते ।।३३।।

येनात्मा परितः परापरवपुः साक्षात्कृतः सत्कृतः
स्वात्मानुग्रहशक्त्यवाप्तसहजज्ञानेन संविन्मयः ।
नो दुःखं न सुखं जयाजयकथा नापुण्यपुण्यादि नो
तस्यास्ति प्रतिमादिमोहविधिषु प्राज्ञः स मुज्जे(ञ्जे)त्कथम् ।।३४।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स्वीयज्ञस्य शरीरमन्यदमि वा कुम्भादि देवालयाः
पूजा दुस्त्यजमोहबुद्धिविलयो माला परा मातृका ।
ध्यानं स्वात्मसुचिन्तनं च सहजो जल्पो जपः शाश्वतो
लोकानन्दविधिः समाधिसुखिता सिद्धिः सुपूर्णा मतिः ।।३५।।

येनात्मेदृश ईश्वरः परचिदानन्दैकशान्ताम्बुधिः
स्वात्मानुग्रहशक्तिपातवशतो ज्ञातः स एषोऽभितः ।
लोकस्थं व्यवहारमाचरतु वा नो वा चरेदेष वा
कर्मोत्थं भवबन्धनं नहि कदा सिद्ध्येदमुष्येशितुः ।।३६।।

यत्तत्किञ्चिदिदं स्वभावमधुरे ब्रह्मस्वरूपे मयि
विश्रान्तं मम नास्ति भेदकलना मिथ्या गृहीता विभोः ।
सूक्ष्मोऽहं परमाणुतोऽपि विविधब्रह्माण्डतोऽपि स्फुटं
मूलश्चेतिधिया विहारमतुलं कुर्वञ्जयत्यात्मवित् ।।३७।।

नानाकुम्भगतोऽभितो विविधया तत्तत्प्रकृत्या विभु-
र्निर्नानाप्यनुरञ्जितान्तर इवाकामः परं निर्मलः ।
एकोऽप्यात्ममहेश्वरोऽयममलः स्वाभासितार्थस्थितो
नानेवाज्ञधियेक्ष्यते न तु कदा नानास्त्यसौ वस्तुतः ।।३८।।

स्वेच्छार्ताभिरसौ शिवः प्रकृतिभिः शैलूषवत्खेलति
दुर्लक्ष्यः प्रकटस्थितोऽपि च वृतो देव्या महामायया ।
स्वात्मानुग्रहशक्तितो विदिततां यातः परानन्ददो
नो चेत्तत्परितो विकल्पनिगडैर्बद्धः परं दुःखदः ।।३९।।

ज्ञातश्चेदयमीश्वरः सुविमलो बोधप्रकाशोऽचलो
नो किञ्चित्करणीयमस्ति हि तदा शिष्यं कदाचित् क्वचित् ।
तज्ज्ञः संविदितात्मभूतिरचलः पूर्णः स्वतन्त्रोऽद्वय-
स्तिष्ठत्यस्तसमस्तमोहकलनं शान्तश्चिदम्भोनिधिः ।।४०।।

नाहं न त्वमयं न चेतरदथो चिन्मात्ररूपे परे
शान्ते भेदविकल्पदुष्कलनया हीनेति पूर्णे पदे ।
सर्वं स्वात्मविजृम्भितं सुखमयं निर्मोक्षबन्धोज्झितं
मा त्यागं ग्रहणं च मा कुरु विभो तिष्ठात्मना स्वात्मनि ।।४१।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

त्वं विष्णुस्त्वमथाम्बुजन्मनिलयस्त्वं शङ्करस्त्वं मरु-
न्नाथस्त्वं शशिभास्करौ त्वमखिलं त्वं किञ्चिदेवापि न।
सङ्कल्पात्स्वयमोहितादिदमहंरूपात्पिशाचादिव
बालो भीतिमुपैति निष्फलतरां क्रीडन् स्वतन्त्रः कथम् ।।४२।।

चेत्सङ्कल्पममुं भवेत्तव विभोस्त्यक्तुं निजानुग्रहात्
स्वेच्छा तत्क्षण एव तत्स विगलेन्नास्त्यत्र शङ्कापि का ।
सङ्कल्पे गलिते विभुः प्रविलसच्छक्तिप्रभावं निजं
रूपं संस्मरसि प्रदीप्तमथ तत्स्मृत्वा सुखं लप्स्यसि ।।४३।

आनिष्टं मदथास्ति यत्र हि कदा कुत्रापि वा पुष्पवत्
स्वेच्छायास्विव यक्षवच्च मरुभूस्तृष्णावरुद्धं मुधा ।
हारो तस्य कियत्प्रयासगणनं कीदृक् क्व वा स्यादहो
यद्वाऽनेन तु तस्य चिद्घनवपुर्भीतो यथासि स्थितः ।।४४।।

चित्रादौ विषफूत्कृतिर्ननु यथा स्थाणौ पिशाचो यथा
द्वित्वं शीतरुचौ यथा हरिपदे नीलाकृतिर्वा यथा ।
आत्तोयं निजयेच्छयापि सहजस्वात्मप्रतिज्ञानतो
नो तिष्ठत्यमले त्वयि त्रिमलजे बन्धो यतस्ते भयम् ।।४५।।

इच्छैतस्य निजस्वरूपममलं विज्ञातुमाद्यं परं
स्वात्मानुग्रहशक्तिचोदितहृदो भूयाद् यदैव स्वयम् ।
आख्यातिश्च विकल्पदातिमलिना लीना भवेत् तत्क्षणात्
स्वीयं तत्प्रभुतासुखं च विलसत्यन्तर्विमृष्टं दृढम् ।।४६।।

सर्वं सान्त्वनपूर्वमस्य विमलैर्वाक्यैर्महाशान्तिदं
सन्दिश्यामृतसुन्दरं सुविपुलं ब्रह्मात्मबोधं परम् ।
श्रीनाथः पुनरप्युवाच सुतरां भक्त्या प्रसन्नान्तरो
वारं वारमवेक्ष्य सस्मितमुखं स्वात्मानुभूत्युन्मुखम् ।।४७।।

कश्चिन्मद्वचनैः सुधारसवरैर्मिथ्या दुरज्ञानतो
मुक्तोऽसि स्वविकल्पताद्वद विभो स्वीयां दशां सत्वरम् ।
श्रुत्वैवं गुरुवाक्यमात्मविभवं भूयः स्मरन् विस्मृतं
शिष्योऽपि प्रकटीचकार विशदां स्वात्मानुभूतिं पराम् ।।४८।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

आसेवं स गतः पिशाचमतिवन्मिथ्यागृहीतः स्वयं
मोहस्तत्पदमाशु नाथ विदितं त्वत्सत्कृपावाक्यतः ।
यस्त्वं सोऽस्मि स ईश्वरः सकलगः सर्वः स्वतन्त्रोऽद्वयो
भेदो नास्ति मनाक्कदापि ननु मे ते तस्य शम्भोरपि ।।४९।।

एतावन्तमहं मुधैव निजया कालं धिया वञ्चित-
स्त्वद्वाक्यानि समाप्य शान्तममलं प्राप्तोऽस्मि ब्रह्म ध्रुवम् ।
न त्वं नाहमिदं च यत्र न परे भान्त्यक्रिये केवले
ज्ञानाज्ञानविकल्पबुद्धिरहिते सच्चित्सुधाम्भोनिधे ।।५०।।

मन्येऽर्धोदयशैलतो गुरुवरैरर्कैर्यदैवोदितं
स्वाज्ञानं तिमिरं तदैव चलितं कुत्राप्यसत्कष्टदम् ।
संफुल्ला विषदा स्वभावमधुरा दृष्टिस्तदद्य स्वयं
स्वात्मज्ञानमभिप्रवर्तत अलं पूर्वाह्णिकार्यं यथा ।।५१।।

श्रीशम्भुं स्फुटसम्पदं सकलगं श्रुत्वा भवद्वाक्यतो
वृद्धाऽभूदनिशं महासुखमये तद्दर्शने लालसा ।
संदृष्टः स यदा न कोऽपि विमलस्तस्माद्दिदृक्षोः पर-
श्चित्राक्रान्तमनास्तदा निगदितुं किञ्चित्क्षमोऽहं नहि ।।५२।।

चित्तं मुक्तमिदं ममाभवदहो स्वाभासरूपं यदा
बद्धोऽहं परितो विमोहनिगडैरासं समन्तात् तदा ।
बन्धं तत्स्वमनीषया खलु यदा यत्नेन वृत्तिग्रहा-
न्निर्मुक्तोऽस्मि तदादि चिद्घनवपुर्नित्यो विभुः केवलः ।।५३।।

नैवेहामरतां विभुत्वमपि वा नोपेन्द्रभावं यत-
स्तज्जन्मादिविधौ स्वतन्त्रपरभा अस्मिन् क्षमो नु क्षणम् ।
इच्छा सा गलतादिति प्रतिभया कुत्रापि तज्ज्ञप्रथा -
संज्ञेच्छां समुपास्य कुत्र चरमे सत्कृत्य कर्ता मुहुः ।।५४।।

ऐक्ये वागपि पिष्टपेषवदलं यत्र प्रलापायते
सत्तर्केषु रथाश्मनीव शितधीः शल्योऽपि कुण्ठायते ।
सन्तुष्टोऽपि चिरं यदभ्युपगमान्मायाभ्रमः क्षीयते
तापाम्भोवदचिन्त्यशक्तिमहिमा मोहं शिवः शाश्वतः ।।५५।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स्वात्मा यत्परितो मया परचिदानन्दैकधाम्ना स्मृतो
दाक्षिण्यं न तदस्ति मेऽतिविमलप्रज्ञावतामीशितुः ।
यद्वा सीदति चित्रशक्तिपरमाधारोऽपि विस्मारितः
सोऽयं श्लाघ्यममन्दबुद्धिविषयं दाक्ष्यं तदत्यद्भुतम् ।।५६।।

आक्रान्तः स महेश्वरः स्ववपुषा प्राप्ता च लक्ष्मीः परा
दग्धं द्वैतवनं क्षणाच्च परितो नीताः क्षयं शत्रवः ।
मृत्युश्चापि विलङ्घितः स्वभयदः सत्याद्वितर्कान्मया
देवीवद्दनुजारिवद्दहनवद्दम्भोलिवद्देववत् ।।५७।।

वाचा वच्मि न नो ददामि करयोर्द्वन्द्वेन पद्भ्यां व्रजे
नोपस्थेन लभे सुखं न रचयाम्युत्सर्जनं पायुना ।
नो जिघ्रामि च घ्राणया न रसया कर्तारमस्पर्शनं
जाने नो श्रवसा शृणोमि न च नावेक्षेऽपि दृष्ट्यात्मवित् ।।५८।।

नो मन्ये मनसा न निश्चयमथो कुर्वे धिया नाहमा-
स्वाहन्तां परितः श्रयामि निखिलां प्राणेन वा नो हरे ।
स्वात्मस्वात्मनि केवलं परमहा इच्छामि जाने तथा
कुर्वे सर्वमखर्वगर्वनिलयः कोऽप्यद्भुतो मे नमः ।।५९।।

एवं शिष्यवरः प्रदर्श्य वचनैराभ्यन्तरीं स्वां दशां
पूर्णानन्दमहोदयो विरमयन्नासीद्विहारं तदा ।
साहिब्कौलमहेश्वरैर्विरचितं चित्स्फारसाराद्वयं
योऽप्येवं विमृशेत्परं स लभते चित्स्फारसाराद्वयम् ।।६०।।

व्याकृत्या कृतिनां व्यतीत्य विमलां लक्ष्यावलक्षानुगं
बुद्ध्वा बोधमतिं च कापि हि सतात्मानं सुसंश्रित्य च ।
मत्वा तर्कमनस्तथोपरिषदात्मानं समाधाय तां
विश्रान्तोऽस्मि चिरं शिवाद्वयतया सत्तास्फुरत्तामयः ।।६१।।

शाके विक्रमभूपतेः परिमिते खभ्र्वर्षिजैवातृकैः[१]
साहिब्कौलपदे स्थितः सति सतीकामारजाते हिते ।

---

१. ख भू ऋषि जैवातृक = १७१० वि० सं०

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

वर्षैः षोडशधामितैः परिचिते कारुण्यवारांनिधिः
सोऽहं संव्यदधं मुमुक्षुगतये चित्स्फारसाराद्वयम् ।।६२।।

शीतं तं सुरसं तनोति सुमदं धत्तेऽखिलं निर्मलं
व्याप्नोत्याप्तसमस्तदाहविरहं तेजस्तनोति ध्रुवम् ।
स्वान्तं शान्तनिरन्तरत्रयकलं वा ब्रह्मशर्मामृतं
गङ्गावद्गजगण्डवद्गगनवद्गाङ्गेयवद् गेहवत् ।।६३।।

।। इति श्रीमच्छ्रीमहामाहेश्वाचार्यवर्यसाहिब्कौलानन्दनाथविरचितः
चित्स्फरसाराद्वयप्रबन्धः सम्पूर्णः ।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

शिवजीवदशकम्

येनोत्कीर्णं विश्वचित्रं स्वभित्तौ नानावर्णैश्चित्रितं येन भक्त्या ।
अन्ते स्वस्मिन्नृत्यते येन हृत्वा सोऽहं साहिब्कौलकारामशम्भुः ।।१।।

कःस्विद्देहः कस्य देहः क्व देहो देही देहेनैव बद्धो न बद्धः ।
सोऽहं शम्भुर्विष्णुरर्को गणेशो धाता शक्तिः सर्वशक्तिर्नमो मे ।।२।।

नाहं जाने नैव कुर्वे नवेच्छामाविर्भावं चेत्यचेत्यो न यामि ।
जाने कुर्वे स्वेच्छया स्वं परं स्वं भावं भावं भावभावो नमो मे ।।३।।

जाग्रत्यां वा स्वप्नजायां दशायां सौषुप्त्यां वा या चिदाभाति तुर्या।
तामप्येतां तिष्ठते स्मा अतीत्य सर्वस्मै मे सर्वभासे नमोऽस्तु ।।४।।

मृत्युर्मृत्युर्मृत्युभाजां न मृत्युर्मत्युज्ञानां नैव जाता यतस्ते ।
सो ऽहं मृत्युं चाप्यमृत्युं व्यतीत्य भासे भासा मृत्युमृत्युर्नमो मे ।।५।।

यश्चित्तेनामृष्टमेतद्विभाति यत्नस्तस्याभानमेवेह भानम् ।
नातो यैस्संचेतितो जन्मभावस्तेषां मृत्युः कः क्व दृष्टः श्रुतः क्व ।।६।।

चेत्संयोगो देहजो जन्मभावस्तद्विच्छेदो मृत्युरित्येव वादम् ।
तत्संयुक्ते वा वियुक्ते स्वबन्धौ कस्तज्ज्ञानां हर्षशोकावतारः ।।७।।

कोऽहं कोऽहं यावदित्थं स्मरामि सोऽहं सोऽहं तावदासं पुरोऽस्मि ।
स्यां चास्मृत्वा त्वामिमं मां च तं यं स्वात्मा स्वात्मन्यस्मि शेषोऽहमेकः।८।

मत्तो भानं त्वन्मयं मन्मयं च मत्तश्चेत्तत्साम्यमेवात्र भाति ।
भानं भानं चाप्यभानं च भानं सोऽहं भामि प्राप्तभेदैकभावः ।।९।।

भानं चेत्स्यान्निर्विमर्शं न तत्तच्चैतद्रूपं तर्हि भेदो न योऽन्तः ।
भारूपायाहंविमर्शात्मकाय जीवायास्मै मे नमो वा शिवाय ।।१०।।

देहे याते मृत्युकल्पामवस्थां पंक्तिश्लोकी केन चित्संस्मृतेयम् ।
पंक्तिश्लोकीं प्राप्य संज्ञाकृतान्या साहिब्कौलारामस्वस्थेन भूयः ।।११।।

पंक्तिश्लोकीं दैशिकेन्द्राद्विशुध्य भूयो भूयः स्वात्मना संविमृष्य।
जीवं प्राप्य स्वानुभूतिं विमुक्तो लीयेतास्मिन् धाम्नि नित्ये शिवे स्वे ।।१२।

इति श्री महामाहेश्वराचार्यवर्य-साहिब्कौलानन्दनाथविरचितं
शिवजीवदशकं संपूर्णम् ।। ॐ ।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

श्रीसहजार्चनषष्टिका

ॐ तत्सत् । ॐ स्वस्ति । ॐ श्रीगणेशायोन्नमः ।।

यत्सत्प्रमादवशतो नितरामिदन्ता-
रूपश्चिरं स्वकलितो गलितो विमोहः ।
सर्वैकगर्वनिलयं जितखर्वभाव-
स्तं स्वात्मशम्भुममलं मुहुरर्चयामि ।।१।।

यं प्राप्य चित्तममलीभवति क्षणाच्च
वैशाल्यमेति जलकुम्भ इवाम्बुराशिम् ।
नित्यं निजानुभवगम्यमखण्डशक्ति-
मर्चामि कञ्चिदतुलं परमेश्वरं तम् ।।२।।

यस्मादिदं जगदुदेति विचित्रनाम-
रूपं दलादिरिव नैकतयैकबीजात् ।
हेम्नीव कङ्कणगणादि विलीयते च
यस्मिन् विवेकवशतोऽथ तमर्चयामि ।।३।।

यो व्याप्य तिष्ठति च सर्वमिदं घटादि
व्योमेव नित्यविमलो बहिरन्तरे च ।
स्वात्मानमात्मनि मुहुर्मुहुरस्तमिथ्या-
सङ्कल्पराशिरखिलं शिवमर्चयामि ।।४।।

देहो न योऽस्ति न च वा करणं न चार्था
नो धीर्मनो न च न कर्म न खं न जीवः ।
कर्त्रादि कोऽपि न च केवलमेव मुक्तं
तं स्वप्रकाशविमलं शिवमर्चयामि ।।५।।

आदाय सर्वगतमावरणाख्यशक्तिं
रूपं निजं पशुप विस्मृतवान् भवान् यः ।
सुप्तो यथा जन उपेत्य पुनः प्रबोधं
स्मर्तास्यनुग्रहबलेन च तं भजे त्वाम् ।।६।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

पाद्यं विचारसुरसोऽस्ति महेश यत्र
दान्तिश्च चन्दनमथोपरतिर्महार्घ्यम् ।
यत्रास्ति शान्तिरमलं कुसुमं प्रफुल्लं
तेनार्चनेन परमेश्वरमर्चयामि ॥७॥

यत्रैति नो दिनकरादि महाप्रयोगं
यस्मिंश्च वीक्षत इदं बहिरन्तरे च ।
स्वान्तं नितान्तमुपशाम्यति सर्वकान्तं
तं स्वप्रकाशविशदं शिवमर्चयामि ॥८॥

उन्मेषतस्त्रिजगतोऽभ्युदयोऽस्ति यस्य
सर्वेश्वरस्य विलयोऽपि निमेषणेन ।
तं चिद्विलासनिपुणं परमेशमच्छं
तुच्छाभिमानविमुखः सुखमर्चयामि ॥९॥

दैन्यं न यत्र न मदो न च वानुकम्पा
क्रौर्यं न यत्र च तमद्भुतभावमीड्यम् ।
आसाद्य सम्यगखिलर्द्धियुतः सपर्यां
देवस्य शुद्धवपुषो रचयामि नित्यम् ॥१०॥

नो यत्र दुःखमतुलं न सुखं च यत्र
नो जन्म यत्र मरणं च न यत्र भाति ।
शष्पीकृतेन्द्रविभवः खलु तत्पदस्थः
सोऽहं शिवार्चनपरो विहरामि नित्यम् ॥११॥

देशो न कश्चिदपि यद्व्यतिरिक्तरूपो
वाणी न काचिदपि यत्स्तुतिरिक्तभावा ।
चित्तं न किञ्चिदपि यत्कलनातिरिक्तं
नित्यं तदर्चनमिदं सहजं करोमि ॥१२॥

वक्तुं क्षमा निगमवाक् च न यत्स्वरूपं
कर्तुं न चित्तमपि यत्स्मरणं समर्थम् ।
यं प्राप्य चैति कुमतिर्नहि भूय एनं
तं शम्भुमद्भुतगतिं मुहुरर्चयामि ॥१३॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

युक्त्या विचारविभवस्य विशुद्धभक्त्या
भुक्त्या परामृतरसस्य विमोहमुक्त्या ।
एताभिरेव रचनाभिरहं समेतो
नित्यं शिवार्चनपरो रचये विहारम् ।।१४।।

पश्यन् समस्तरचना भुवनावलीनां
कुर्वन् क्रियाः सततभङ्गुरवृत्तिरूपाः ।
कुर्वन् क्रियाश्च विविधाः प्रहसन्दृशंश्च
नित्यं त्वसक्तहृदयशिशवमर्चयामि ।।१५।।

विद्वेषरागमददैन्यमुखा मुखाद्वै
भावैश्चिदुल्लसितभूमिरनन्तमाद्यम् ।
संशान्तसर्वकलनं भव निश्चितार्थै-
र्मुग्धैरगम्यमखिलं शिवमर्चयामि ।।१६।।

निन्दास्तवैः सुकृतदुष्कृतसंप्रयोगै-
र्वर्ज्यैः सुबुद्धमतिभिः प्रथितानुभावम् ।
किञ्चिन्निरन्तरनिजानुभवैकगम्यं
देवं शिवं सततमद्भुतमर्चयामि ।।१७।।

क्रोधेन कामललितेन विमोहभीत्या
स्वास्थ्येन दुःस्थिततया कलिना च हृष्ट्या ।
क्षान्त्या भ्रमेण च महेशमखण्डशक्तिं
सत्यं विशुद्धमतुलं मुहुरर्चयामि ।।१८।।

कृत्वा सदूरमखिलाः कलना हृदुत्थाः
श्रित्वा विवेकसुहृदं सुखदं समन्तात् ।
हित्वाऽभिमानमधमं परिमोहराशिं
सच्चित्स्वरूपममलं मृडमर्चयामि ।।१९।।

द्वित्वं न नैक्यमपि वा न भवन् न चाहं
नास्त्यस्तितापि न च यत्र कथं तदीड्यम् ।
शम्भो विना भवदनुग्रहशक्तिपातं
विज्ञायते सुसुखदं सहजार्चनं ते ।।२०।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

यत्प्राप्तये शुकविदेहनृपादयश्च
चेरुस्तपोऽतिकठिनं सुचिरं तदाद्यम् ।
संप्राप्यते वितुलसद्गुरुणोपदिष्टा-
न्नूनं क्षणान्निजपदं सहजार्चतं ते ।।२१।।

दुर्वारमारशरपीडितमानसाया
वध्वा रतेः सुखकरो न परोऽस्त्युपायः ।
यद्वत्तथेश्वर विमोहभवाभिताप-
शान्तो विना तव रसं सहजार्चनस्य ।।२२।।

अस्माज्जगज्जलनिधेः परियामि पारं
दूरं कथं दृशमिति प्रतिभोत्थितेश ।
यस्यात्र तस्य परमां सहजां सपर्यां
नूनं विना सुखकरो न परोऽस्त्युपायः ।।२३।।

यस्ते क्षणं क्षणमनन्यमनाः सपर्यां
स्वाभेदवच्छिव करोति कयापि तुष्ट्या ।
तस्य प्रकाम्यदनुजारिबलारिभूमिः
शष्पायतेऽप्युपगता विदितात्मभूतेः ।।२४।।

साम्येन पश्यति महेश स मित्रशत्रु-
दारिद्र्य-राज्य-सुख-दुःख-सुवर्ण-लोहान् ।
सर्वात्मभावरमणीयतरर्द्धिभाजो
यः कोऽपि वेत्ति विरलः सहजार्चनं ते ।।२५।।

सर्वं स पश्यति न पश्यति किञ्चिदेव
सर्वं करोति न करोति च किञ्चनापि ।
सर्वं शृणोति न शृणोति च किञ्चिदेव
यस्याखिलेश विदितं सहजार्चनं ते ।।२६।।

अप्राप्तमीप्सति न नोज्झति जात्ववाप्तं
शेषं न हर्षमपि नाथ न वा दधाति ।
स्वात्मन्यनन्तविभवेऽतिचमत्करोति
नित्यं स्वयं शिव भवत्सहजार्चनस्थः ।।२७।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

किञ्चिन्न निन्दति न रौति न याचते च
दत्ताभिमानमपि नाथ न वा दधाति ।
कस्मिंश्चिदेष सुखदे स्वपदे स्वतन्त्रः
खेलत्यनन्यहृदयः सहजार्चनात् ते ।।२८।।

वायुः स्थिरत्वमुपयात्यनलः कदाचि-
च्छैत्यं धरापि लघुतां जलमद्रवत्वम् ।
तेजस्तमस्त्वमपि वा न तु जातु शम्भो
त्वत्पूजको व्यपसरेत् स्वपरस्वभावात् ।।२९।।

कारागृहं भवति नाथ गृहं च तावत्
तावच्च सन्ति विषया विषभावमाप्ताः ।
तावच्च बन्धनविमुक्तिकथास्ति यावत्
पुंसो न तेऽत्र विदिता सहजा सपर्या ।।३०।।

धन्यस्य यस्य हृदयं भवतोऽतिपुण्ये
मान्येऽप्यनन्यपदगं विमले विलग्नम् ।
पूजारते गतसमस्तमुधाभ्रमाप्तेः
किं तस्य तीर्थकृतदानतपोभिरर्थः ।।३१।।

स्वर्गः क्व रौरवमथो क्व नभःपृथिव्या-
वेतौ च सूर्यशशिनौ क्व परः क्व चात्मा ।
देहः क्व चित्त्वमपि कुत्र महेश शम्भो
सम्यक्पदार्चनरसेन विघूर्णितस्य ।।३२।।

कीनाशिकोऽपि खलु याति विनाशमीश
यक्षोऽप्यलक्षगतिमेति मुहूर्तमात्रात् ।
दूरं प्रसर्पति सभीतिरथासुरोऽपि
त्वत्पूजकस्य मुखमेव विलोक्य दूरात् ।।३३।।

येनाभितः परमतोषितयेह न त्वं
संपूजितोऽसि सततं शिव सर्वथैव ।
लब्ध्वापि राज्यमखिलं भुवि नाकनाथ-
भावं च वेत्ति स कथं सुमुखस्य सारम् ।।३४।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

येनापि चिन्तितमिदं सहजार्चनं ते
भक्त्या शिव क्षणमपि प्रथितानुभावम् ।
कालेन सोऽपि ननु याति निजं पदं तत्
संप्राप्य यत्पुनरपीह निवर्तते न ॥३५॥

दानप्रदाः कति न वा कति नर्द्धिवन्तः
शूरा न वा कति कतीह न वा कलाज्ञाः ।
याताः परन्तु खलु तिष्ठति सर्वदाऽसौ
येनेक्षितोऽसि भगवन् सहजार्चनेन ॥३६॥

ब्रह्मा हरिश्च मघवा स यमोऽपि वह्नी-
रक्षांस्यथो वरुणवायुकुबेररुद्राः ।
सिद्धाः सुरासुरगणाश्च निदेशमस्य
कुर्वन्ति यस्य विदितं सहजार्चनं ते ॥३७॥

स्थाने कविर्न स कविर्न गुरुर्गुरुर्वा
स्त्रष्टापि सृष्टिकृदथास्ति न चैव जातु ।
सोऽयं कविः सगुरुरीश स सृष्टिकर्ता
ज्ञातोऽसि येन सततं सहजार्चनेन ॥३८॥

यातीह कस्य नहि कार्यगणानुवृत्त्या
निःसारया विमुखया च मुधैव जन्म ।
सार्थं तु तस्य तदवैमि यदीयचेत-
स्त्वत्पूजने सुखनिधौ विमले विलग्नम् ॥३९॥

स्वीयानुभूतिसमयैकसुगोचरस्य
यः पूजकस्तव भवन्ति न तस्य वक्तुम् ।
शुद्धात्स्वभावमधुराज्जडबुद्धिगम्या
वाचस्पतिप्रभृतयोऽपि गुणात्मसङ्गाः ॥४०॥

स्नानं सदाप्यखिलतीर्थवरेषु कृत्वा
दानं यथोक्तविधिना सततं च दत्त्वा ।
येनेदृशं न विहितं सहजार्चनं ते
श्रीकण्ठ मर्त्यवपुषापि स गर्दभेशः ॥४१॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

माता न मेयमपि नो न मितिश्च हेतु-
मोंहाभिलङ्घनविधौ सहजार्चनस्य ।
प्राप्तिं विना खलु कदापि विहाय पोतं
यातः सुधीः क उडुपेन महाब्धिपारम् ।।४२।।

येनाभितो मुहुरसि प्रथितः सुशुद्धो
मुक्तश्चिदाकृतिरजः सहजः स्वतन्त्रः ।
साक्षात्कृतो भव भवच्छुभपूजनेन
निःसंशयं स परमो भगवंस्त्वमेव ।।४३।।

दानं सुमेर्वधिजनुप्रभृति व्रतं च
शीतातपाभिसहनं बहुयज्ञदीक्षाः ।
नार्घन्ति लक्षमितमंशममुष्य शम्भो
कस्यापि देव भवतः सहजार्चनस्य ।।४४।।

चित्तं प्रसीदति कृतान्तभयं व्यपैति
विद्या च सिद्ध्यति सुनिश्चयमेति बुद्धिः ।
दूरं गलन्ति कलिता विफला विकल्पाः
किं किं भवेन्न भवतः सहजार्चनेन ।।४५।।

रक्तोऽस्मि शान्तसुखदे निजसद्विचारे
मुक्तोऽस्मि मोहनिगडात् स्वमनोगृहीतात् ।
शक्तोऽस्मि कालमपि वञ्चयितुं प्रचण्डं
भक्तोऽस्मि ते सहजपूजकशर्मदस्य ।।४६।।

क्षीवेव मर्मवचनैर्न स वक्ति वाक्यं
सर्वत्र मन्त्रमिव चिन्तयतीह चित्तम् ।
जानाति बुद्धिरपि सर्वगतं प्रियं स्वं
कान्तावियोगविधुरेव कृतार्चनस्य ।।४७।।

पूर्णैकचिद्रससुचर्वणघूर्णितोऽहं
चूर्णीकृताखिलविषादविमोहराशिः ।
न त्वन्मयेऽपि वितते प्रथिते स्वरूपं
भाभिः प्रकाशविशदे भवदर्चनेन ।।४८।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

योगेन केवलतरा सुचिराद्विमुक्तिः
संप्राप्यतेऽन्यसुरपूजनशं च कैश्चित् ।
धन्योऽस्म्यहं तु करगे ननु यस्य मुक्ति-
भुक्ती सुभक्तिमहिते भवदर्चनेन ।।४९।।

गीतं च नृत्तममितं च करोमि तुष्टः
पूर्णं रसं च रसयामि कमप्यवाच्यम् ।
सर्वं समं च ननु रोदिमि वा हसामि
सम्यक् तवेश सहजार्चनवैभवेन ।।५०।।

पूर्वं श्रुतोऽसि निगमान्तवचःसमूहाद्
गर्भोपपत्तिभिरथेश्वर सम्मतोऽसि ।
ध्यातोऽसि तत्सदृशमस्तसमस्तमोहं
साक्षात्कृतोऽसि भगवन् सहजार्चनेन ।।५१।।

दस्रोपमोऽसि भवजातिहृदीश यत्र
कालः समाकलयते न न यत्र पातः ।
अग्नेर्न संस्फुरति यत्र च दाहशक्ति-
राप्तं पदं निजमिदं सहजार्चनात् ते ।।५२।।

वाञ्छन्ति केचिदमरेशपुरे निवासं
केचित् प्रभाकरपुरे च परेऽजलोके ।
केचिच्च रुद्रनगरे गरुडध्वजस्य
लोके परे निजमनष्कलनानुरूपम् ।।५३।।

वाञ्छन्ति ते यदिह ते शिव यान्ति तत्र
शास्त्रोक्तकर्मविधिना सततं यतित्वा ।
प्राप्तं पदं सुसुखदं तु मयार्चनात्ते
तद्यत्नदृष्टमपि तत्पुरुषैः कदाचित् ।।५४।।

सत्यं ब्रवीमि कृतिनः श्रवणं ददन्तां
तत्किं मया न यदलं विहितं शिवाप्त्यै ।
किन्तु प्रभो सहजपूजनमेव सम्यग्
जातं निजास्पददशार्तिहरं सुशुद्धम् ।।५५।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

क्रीडायते भव भवाखिलभावभङ्गि
ब्रीडायते भ्रमबलं च विचिन्त्य चित्तम् ।
पीडायते सुरुचिरा तु विचारचिन्ता
नित्यं त्वदर्चनपराय महेश मह्यम् ।।५६।।

कष्टप्रदं परमपूरुषभावहर्तृ
द्वैतं घृणास्ति गदितुं सुधियो न कस्य ।
ऐक्यं तु वक्तुमुचितं च विलज्जितोऽस्मि
सम्यक् तवेश सहजार्चनवैभवेन ।।५७।।

विश्रम्य मार्गजनितं सुखतामुपैति
दुःखं यथेह शिवयोगनिषेवणेन ।
खेदेऽपि चित्तदलने परहर्षशेष-
स्त्वद्दर्शनेन भजतां भवतां विमुक्त्यै ।।५८।।

ज्ञानी कदाचिदपि मोहगतो न मुह्ये-
दज्ञो विदन्नपि च तिष्ठति मोहमग्नः ।
सोपाध्यपि क्षणविशुद्धिकृषाणुयोगाद्
गङ्गेयमेव न तु जातु महेश लोहम् ।।५९।।

यत्साधनाय कृततीव्रतरप्रसास-
स्तोषं सुशुद्धममलं तदिहात्मनैव ।
यत्संमतं च मम सिद्धतया बभूव
तत्साध्यतां गतमहो परमा स्वशक्तिः ।।६०।।

स्वात्मायमेव सततं स्फुरति प्रबुद्धः
कर्ता च यद्यपि परः सकलः परं तु ।
कार्योऽनुसन्धिरिह तस्य तदर्थमेषा
सूक्तिर्जयत्यतितरां सहजार्चनस्य।।६१।।

श्रीस्वात्मनाथ यदनुग्रहशक्यवाण्या
व्याख्यास्पदेन सहजार्चनषष्टिकेयम् ।
पूर्णेन चूर्णितविमोहदरेण सहिब्-
कौलेन सत्यमुनिना रचितैक्यसिद्धिः ।।६२।।

।। सहजार्चनषष्टिका सम्पूर्णा ।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

आचार्यसिल्हणस्य

स्वात्मोपलब्धिशतकम्

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स्वात्मोपलब्धिशतकम्

ॐ स्वस्ति। ॐ नमः श्रीपरादेव्यै ।

ॐ अन्तर्विलसितानन्तशक्तित्रितयगर्भिणे ।
निरस्तसर्वकृत्याय स्वभावमहसे नमः ।।१।।

नमः स्वानुभवग्राह्यप्रकाशानन्दमूर्तये ।
सर्वमूर्त्यन्तरस्थाय नित्याय परमात्मने ।।२।।

उन्मेषमात्रसम्पन्नजगन्निर्माणकेलये ।
नमः स्वतन्त्रतोदारपरमैश्वर्यशालिने ।।३।।

परापरेण रूपेण स्थावरेषु चरेषु च ।
एकोऽप्यनेकतां यातो भूतग्रामेषु यश्चरन् ।।४।।

गोपयन् महिमानं स्वं मायाशक्तितिरोहितः ।
प्राणपुर्यष्टकाविष्टो मितमातृवशाश्रितः ।।५।।

स्थूलभूतः शरीरस्थः कर्मपञ्जरयन्त्रितः।
सुखदुःखादिभोक्ताऽसौ भवे विपरिवर्तते ।।६।।

ततः स्नेहादिभिर्भावैर्मोहितः परिकल्पितैः ।
विस्मृत्य निजमात्मानमनात्मनि निमज्जति ।।७।।

मिथ्याभिमानमूढस्य रागोपचितचेतसः ।
कोऽस्मीति चित्परामर्शो मनागपि न जायते ।।८।।

अनात्मन्यात्मसंवेदलक्षणोऽयमतात्त्विकः ।
अविद्याध्यासितस्यास्य बन्ध इत्युपचर्यते ।।९।।

स तेनापहृतस्फारसर्वज्ञत्वादिवैभवः ।
इयत्तामात्रनिष्ठेन संकोचेनाभिभूयते ।।१०।।

ममेदमित्यसंबद्धैर्भावैर्व्यामिश्रयंस्तनुम् ।
पतत्यगाधसंयोगवियोगैर्विषमावटे ।।११।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

पशुत्वे वर्तमानोऽपि भावैर्भावैर्मुहुर्मुहुः ।
उद्भवस्थितिसंहारान् करोति निजशक्तिभिः ॥१२॥

मायाविद्याकलाकालरागनैयत्यमुद्रितः ।
आविर्भावतिरोभावे विदधाति गतागतम् ॥१३॥

विकल्पाकुलितस्यापि बाह्यावृत्तिजुषोऽपि वा ।
पदे पदे जडितस्य चिद्व्यक्तिर्नोपजायते ॥१४॥

जडस्वभावा अप्येते बाह्या घटपटादयः ।
प्रकाशरूपतां यान्ति तदन्तः प्रतिबिम्बिताः ॥१५॥

हृदयात् सर्वभूतानामग्नीषोमात्मकौ सदा ।
प्राणापानावधश्चोर्ध्वं प्रेरयन्नवतिष्ठताम् ॥१६॥

स्फुरत्कुण्डलिनीगर्भनादमुद्रातुरोम्भिता ।
उत्प्राणितैव पञ्चाशद्वर्णोच्चरति मातृका ॥१७॥

तन्मरीचिचयोदारस्फारविस्फारितो जडः ।
चेष्टते विषयेष्वन्तर्बहिःकरणविस्तरः ॥१८॥

यत्रोपलभते बाह्यान् विषयान् करणक्रमात् ।
जागरूको तदा जाग्रदवस्थास्थोऽयमुच्यते ॥१९॥

इन्द्रियैरिन्द्रियार्थैश्च विनैवानुभवोऽस्य यः ।
प्राक्तनज्ञानसंस्कारात् स्वप्न इत्यभिधीयते ॥२०॥

यदा त्रितयमप्येतदिन्द्रियार्थानुभूतिकम् ।
न संस्पृशति संलीनस्तदा सौषुप्तभाग्भवेत् ॥२१॥

विकल्पैरपरामृष्टा संवित्तिरेव केवला ।
तत्तुर्यं तत्परः शान्तस्तुर्यातीतो निगद्यते ॥२२॥

यत्ये(स्त्वे)ताभिरवस्थाभिरभिमानमदोद्धुरः ।
संसाररङ्गे सरसः शैलूष इव नृत्यति ॥२३॥

विस्मृतस्वात्मविभवं कदाचित् पारमेश्वरी ।
शक्तिस्तमनुगृह्णाति निरपेक्षाव चोदिता ॥२४॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

यथार्ककरसम्पर्काद्विकसत्येव पङ्कजम् ।
भास्करस्य न सापेक्षा नार्थित्वं कमलस्य वा ।।२५।।

तथैव निरपेक्षिण्या स्वरसोदितया विभोः ।
मोहनिद्राप्रसुप्तोऽपि पशुः शक्त्या प्रबोध्यते ।।२६।।

यथा कलुषमप्यम्भः सद्यो याति प्रसन्नताम् ।
कतकस्पर्शसंयोगाच्छक्त्या स्पृष्टस्तथा पशुः ।।२७।।

तथा प्रबोधितस्यास्य कोऽपि मोहविषापहः ।
विवेकः समुदेत्यन्तर्हेयोपादेयलक्षणः ।।२८।।

कुतोऽहमागतः कोऽहमवसाने भवामि किम् ।
जन्ममृत्यू कथं कस्य भवतो वा न तौ कथम् ।।२९।।

उपायाः के कथं हानिस्त्रिविधस्यास्य कर्मणः ।
किं ज्ञेयं ज्ञायते केन कश्च तस्योपदेशकः ।।३०।।

शरीरं किं शरीरी कः को भोक्ता सुखदुःखयोः ।
किं विदित्वा निवर्तेते आवर्तनवितर्तने ।।३१।।

इति सारतरज्ञानचर्वणैककुतूहली ।
चित्तस्य सहजोदारो विचारः कुरुते पदम् ।।३२।।

विमुक्तव्यवहारस्य भोगेभ्यो विरतस्य च ।
स्वल्पसन्तोषशीलस्य वैराग्यमुपजायते ।।३३।।

निसर्गभङ्गुरत्वेन भावानां परिभावयन् ।
अनित्यतां न तैस्सारं सङ्गित्वमधिगच्छति ।।३४।।

तीव्रसंसारकान्तारपरिभ्रान्तिकदर्थितः ।
वाञ्छति प्रशमस्निग्धच्छायां यस्य मनोमृगः ।।३५।।

आपातरमणीयेषु पदार्थेषु प्रियेष्वपि ।
प्रायो वियोगधर्मित्वान्न श्लिष्यति कदाचन ।।३६।।

उत्सेको विभवैर्नास्य निविडैरपि जायते ।
मुहुरायाति निर्वेदं भोगेषु क्षणभङ्गिषु ।।३७।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

इन्दीवरदलश्रेणीविभ्रमैर्मुनिमोहनैः ।
कटाक्षैः पक्ष्मलाक्षीणामस्य नाक्षिप्यते मनः ।।३८।।

अभिमानं समुत्सृज्य विनयावनतः सदा ।
साधुसङ्गप्रसङ्गेन विनोदयति मानसम् ।।३९।।

अनिन्द्यामपराधीनामुचितामकदर्थिताम् ।
प्राणसन्धारणामात्रां निजवृत्तिं समीहते ।।४०।।

आपन्नदर्शनादेव प्रयाति करुणार्द्रताम् ।
चिन्तयत्यप्रियं प्राज्ञो मनसापि न कस्यचित् ।।४१।।

प्रमृ(सृ)तस्यापि कोपस्य वशं याति न जातुचित् ।
उदासीनवदध्यास्ते स्वजनोपचितं गृहम् ।।४२।।

उच्चाटित इवोद्भ्रान्त इवापगतधीरिव ।
अपकृत्येष्ववध्येषु न कदाचित् प्रवर्तते ।।४३।।

सच्छास्त्रश्रवणोद्भूतप्रबोधविशदाशयः ।
बुद्ध्यावबुद्ध्यते पश्यन् सदसद्वस्तुनिश्चयम् ।।४४।।

दुःखैकायतने निन्द्ये सायासे क्षणभङ्गुरे ।
जन्ममृत्युजराग्रस्ते हर्षशोकभयाकुले ।।४५।।

संयोगविप्रयोगाङ्के रागद्वेषकदर्थिते ।
क्षुत्पिपासापरिक्षीणे कामक्रोधोपतापिते ।।४६।।

विकल्पकल्पनाजालकलिते मलिने जडे ।
मानावमाननाम्लाने शङ्काशङ्कुशताचिते ।।४७।।

आशापाशैकविरते ततोऽसौ पाञ्चभौतिके ।
निरुपादेयताहेयशरीरे विचिकित्सिते ।।४८।।

लोकश्रुते नानुभूते कुमार्या सुरते यथा ।
तथास्य स्वात्ममत्तायां प्रतीतिरुपजायते ।।४९।।

अन्यैव सहजोदारचित्तसंकरसुन्दरः ।
अनियन्त्रितसच्छक्तिप्रसरः पारमेश्वरः ।।५०।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स्फुरच्चराचरस्फारनानाकारपरिग्रहः ।
परमात्मा निराकारो निर्विकारः परापरः ।।५१।।

अन्तः स सरसीभूतनिर्विभागनिजस्थितिः ।
प्रतिमादर्शसंक्रान्तविचित्रभुवनत्रयः ।।५२।।

परामृतरसास्वादनिर्भरानन्दसंकरः ।
निराचारोऽखिलाचारचरणैकान्ततत्परः ।।५३।।

कवलीकृतदिग्देशकालाकारादिकल्पनः ।
सर्वतः प्रसरत्स्फारस्वभावभरभास्वरः ।।५४।।

अनादिरव्ययो व्यापी कलनातीतगोचरः ।
निर्विकल्पो निराभासो निष्प्रपञ्चो निरञ्जनः ।।५५।।

निर्गुणो निष्क्रियः शान्तो निरातङ्को निरामयः ।
निरुत्तरो निरुच्चारो निराचारो निरन्तरः ।।५६।।

निःसंशयो निस्तरङ्गो निरौपम्यो निराश्रयः ।
नित्यो निराशो निर्नामा निराह्वानविसर्जनः ।।५७।।

स्वसंवदेनसंवेद्यः सदसद्भावबर्जितः ।
स्वप्रकाशः पराकाशः प्रशान्तविशदाशयः ।।५८।।

अनादित्वात् पुराणोऽयमजत्वादविनश्वरः ।
भासकः स्वप्रकाशत्वाद् व्यापकत्वाच्च सर्वगः ।।५९।।

स्वतन्त्रो निरपेक्षत्वाच्छक्तिमत्त्वात्तथेश्वरः ।
निष्क्रियः कृतकृत्यत्वादचिन्त्यत्वाद् दुरासदः ।।६०।।

निस्पृहः परिपूर्णत्वादजडत्वात् प्रबोधकः ।
निर्विकल्पोऽमनस्कत्वादमूर्तत्वान्निरामयः ।।६१।।

निराभासः प्रशान्तत्वात् सूक्ष्मत्वात् कलनोज्झितः ।
सर्वानुग्रहधर्मित्वात् परोऽप्यपररूपधृत् ।।६२।।

अनाख्यो वागतीतत्वात् स्वतन्त्रत्वादयन्त्रितः ।
दुर्विज्ञेयो रहस्यत्वाद्धृदयस्थोऽपि दूरगः ।।६३।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अशक्यत्वाद्दुरासीनो निर्मलत्वादनावृतः ।
निष्कामत्वादसङ्कल्पो नित्यसत्त्वादसंशयः ।।६४।।

अद्वयो विश्वरूपत्वादनन्तत्वात्तथाऽव्ययः ।
प्रमाणैरपरिच्छिन्नः स्वसिद्धत्वात्तथा विभुः ।।६५।।

एवं रूपोऽपरिज्ञानाद् बन्धदो मोक्षदोऽन्यथा ।
परमात्मेति तत्प्राप्तौ यतते सततोत्सुकः ।।६६।।

विकल्पजालनिर्मुक्तो विरागः शुद्धवासनः ।
ततः सद्‌गुरुणा? स्यक्षरब्रह्मैकलक्षया ।।६७।।

दृशावलोकितः सद्यः स्वसत्तामवगाहते ।
दीप्तिदीप्तो यथा खे खं पयसीव यथा पयः ।।६८।।

तदैतदेकतां याति ब्रह्मणा ब्रह्मसंगतम् ।
स्वरूपानुप्रविष्टोऽसावानन्दैकघनः क्षणम् ।।६९।।

देहभावं समुत्सृज्य किञ्चिदेवावशिष्यते ।
नोपायोपेयभावोऽत्र न भावो न च भावना ।।७०।।

नोदयास्तमये यत्र धाम्नि तस्मिन् विलीयते ।
उन्मेषः प्रशमो यस्मान्मनो यस्मात्प्रशाम्यति ।।७१।।

तस्मिन् सामरसीभावं प्रत्याख्यानन्दनिर्भरः ।
अनुभूतापि या व्यक्तं गिरा वक्तुं न युज्यते ।।७२।।

तां कामप्यात्मसंवेद्यां भजते चिच्चमत्कृतिम् ।
यत्र स्थितो न निर्वेदमुपयाति कदाचन ।।७३।।

प्रलीनकालकलनस्तन्मयत्वं प्रपद्यते ।
गुरुशास्त्रानुभवजैर्निश्चितं प्रत्ययैस्त्रिभिः ।।७४।।

परिज्ञायात्मनाऽऽत्मानं जीवन्मुक्तो विजृम्भते ।
न मे बन्धो न मे मोक्षः खस्वरूपस्य विद्यते ।।७५।।

परादपरतामेत्य भवामि च पुनः पुनः ।
सुखदुःखैकसदनं शरीरं पाञ्चभौतिकम् ।।७६।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

जायते कर्मसंयोगात्पुनरेव विनश्यति ।
शरीराद् व्यतिरिक्तोऽयमात्मा येनोपलभ्यते ।।७७।।

तज्ज्ञानं सदसन्दिग्धमज्ञानं यदतोऽन्यथा ।
यथा तु गुरुणा सम्यगविद्याख्यातिलक्षणः ।।७८।।

सङ्कोचः क्रियते दूरं तदाज्ञाय प्रकाश्यते ।
सोऽयमात्मापरिज्ञानशमिताशेषसंशयः ।।७९।।

शरीरस्थोऽपि तद्धर्मैर्नोपलिप्येत कर्मणा ।
रागादिरुपरागो मे शुद्धस्य स्फटिकादिवत् ।।८०।।

सक्तश्च व्यतिरिक्तश्च शरीरेऽहं जलार्कवत् ।
मध्यन्तरखिलं विश्वमण्डोदरमयूरवत् ।।८१।।

देहस्थितोऽप्यलक्ष्योऽहं कुसुमाद्यधिवासवत् ।
विश्वव्यापी न मायावदमूर्तो नाम्बरादिवत् ।।८२।।

स्वप्रकाशो न मणिवत् कर्ता नो कुम्भकारवत् ।
स्वसंवेद्यो न मुखवत् सूक्ष्मो न परमाणुवत् ।।८३।।

वीतरागो न मुनिवत् साश्चर्यो नेन्द्रजालवत् ।
मुनिभिर्नियमक्षीणैस्तपस्वद्भिः परन्तपः ।।८४।।

अविज्ञातरहस्योऽयं कल्पकोटिशतैरपि ।
अयमेव सदा सद्भिः स्तूयते स्तुतिविस्तरैः ।।८५।।

मार्गैरनेकैर्विद्वद्भिरयमेवोपगम्यते ।
अज्ञानान्धतमश्छन्नदृग्भिर्मायामलीमसैः ।।८६।।

हृदयस्थोऽप्ययं कैश्चित् क्वचिदन्यत्र मृग्यते ।
उक्तिप्रपञ्चैर्विविधैर्भेदोपहतबुद्धिभिः ।।८७।।

हेतुवादैकनिष्ठत्वादयमेव विकल्प्यते ।
आत्मा न कश्चिदेवात्र परमार्थे न विद्यते ।।८८।।

विकारो भूतसंयोगाज्जायते चेतनामयः ।
भूतात्मके शरीरेऽस्मिन् याते कस्मात्प्रलीनताम् ।।८९।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ततो न कश्चिदायातं चार्वाकाः प्रतिपेदिरे ।
गुणात्मिकेयं प्रकृतिः पुरुषस्तु गुणोंखितः ॥९०॥

तयोः पृथक्पृथक्कोऽयं मोक्षोऽसाविति कापिलाः ।
क्षणिकज्ञानसन्तानवादिनः सौगताश्च ये ॥९१॥

आत्मा न कश्चिदस्तीति जगुस्ते शून्यबुद्धयः ।
कर्तृप्रयोजितान्येव चेष्टन्ते करणानि यत् ॥९२॥

अतः प्रयोजकस्तेषां कश्चिदात्माऽनुमीयते ।
समुच्यते तु सहजैर्यदा तु नवभिर्गुणैः ॥९३॥

तदैव मुक्तिरित्यस्मिन् पक्षे नैयायिकाः स्थिताः ।
अहर्ता प्रत्ययग्राह्यः सर्वोपाधितिरस्कृतः ॥९४॥

शुभाशुभैकफलभुक् प्रोक्तो मीमांसकैरयम् ।
इत्येवमाद्यसत्तर्कभिन्नप्रमितिभिः सदा ॥९५॥

वादिभिः स्वप्रमाणैकसिद्धोऽप्येष प्रमीयते ।
सर्वाहम्भावसम्पूर्णो बोधकश्चिन्महेश्वरः ॥९६॥

यदि न स्यान्मते तत्स्थे प्रामाण्यं स्थापयेत कः ।
विमर्शोऽनुभवो ज्ञप्तिरहन्ता विस्मृतस्मृतिः ॥९७॥

तस्मादनादिसंसिद्धो विश्वशक्त्युपवृंहितः ।
केन शक्यो निराकर्तुं विभुः स्वप्रसरोदयः ॥९८॥

विकल्पनिवहत्यागात् सर्वाहम्भावभावनात् ।
स्वानुभूत्येकशीलत्वात् प्राप्यते परमं पदम् ॥९९॥

परानन्दैकविश्रामान्मध्यमार्गावलम्बनात् ।
सर्ववृत्त्युपसंहारात् परमात्मोपलभ्यते ॥१००॥

इत्याप्तशिवसद्भावभावगर्भस्य सूनुना ।
शतकं सिल्हणेनेदं कृतं स्वात्मोपलब्धये ॥१०१॥

इत्याप्तशिवसद्भावः कश्चित्सिद्धमुखोदितः ।
लोकानुकम्पया चक्रे विमर्शोदयमात्मनः ॥१०२॥

॥ इत्याचार्यसिल्हणकृतं स्वात्मोपलब्धिशतकं समाप्तम् ॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

हर्षदत्तसूनोः

बोधविलासः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

बोधविलासः

ॐ नमः प्रमथनाथाय गजवक्त्राय शूलिने ।
चित्पद्मासनसंस्थाय चतुर्धा भिन्नमूर्तये ।।१।।

अवर्णमस्वरं ध्यात्वा व्यापकं परमेश्वरम् ।
व्युत्थाने योगिनामित्थं शिवत्वं जायते स्फुटम् ।।२।।

ततः शक्तिमयो योगी नादवित् स्वात्मविग्रहः ।
लयसम्पत्तिमाप्नोति निराधारपदे स्थितः ।।३।।

श्लोकद्वयमिदं यस्माच्छिववक्त्रागमोदितम् ।
मुद्रैषा योगिकोषस्य विवृत्येह प्रवर्तते ।।४।।

अहङ्कारमयी भूमिः बुद्धिभूमिः परा हि सा ।
तया व्याप्तमिदं सर्वं सैव ज्ञाता विमुक्तिदा ।।५।।

संविद्रूपा पराशक्तिरभिन्ना पारमेश्वरी ।
ज्ञानशक्तिः पुनः सैव मन्त्ररूपा प्रकाशते ।।६।।

अहङ्कारः स्मृतो मन्त्रः शिवशक्त्यनुरूपकः ।
यदनाख्यमवर्णाख्यमशिवः परमेश्वरः ।।७।।

नादविन्द्वात्मकं यत्तु द्वितीया शक्तिरैश्वरी ।
द्वयमेतत्समाख्यातं बीजभूतं शिवात्मकम् ।।८।।

अनेन मुद्रिताः सर्वे वर्णा अञ्चलरूपिणः।
शब्दब्रह्म ततः प्राहुर्योगिनस्तत्त्वचिन्तकाः ।।९।।

अवर्णमस्वरं ध्यात्वा पश्यन्त्या निर्विभागया ।
चिन्मात्रस्पर्शयोगेन विलीनः स्यात् परे पदे ।।१०।।

तथाहि सिद्धैरादिष्टं क्वचित् सिद्धान्तसंग्रहे ।
नाभेरूर्ध्वं वितस्तात्तु कण्ठाधस्तः षडङ्गुलम् ।।११।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

हृदयं पद्ममध्ये तु पद्मं हि हृदि मध्यतः ।
तत्र मध्ये स्थिता सूक्ष्मा कर्णिका त्रियवोपमा ।।१२।।

तत्र मध्ये अकारं तु आत्मतत्त्वं व्यवस्थितम् ।
अकारान्ते परं तत्त्वं चिन्मात्रं तत्त्वलक्षणम् ।।१३।।

तथा ह्युमा मा कथिता विज्ञानभैरवेण तु ।
अबिन्दुमविसर्गं च अकारं जपतो (जयते) महान् ।।१४।।

उदेति देवी सहसा ज्ञानौघः पारमेश्वरः ।
कन्दस्थाने निराधारा द्वितीया शक्तिरैश्वरी ।।१५।।

बीजभूता कुण्डलिनी नादबिन्दुस्वरूपिणी ।
प्राणशक्तिरियं देहे हकाराख्या नदत्यलम् ।।१६।।

कर्णान्तविवरे योगी स्थगित्वा लक्षयेत् स्फुटम् ।
बिन्दुरूपा भ्रुवोर्मध्ये विश्वस्य जननी ध्रुवा ।।१७।।

लक्ष्यते योगिभिर्नित्यं भ्राजमाना स्वतेजसा ।
तस्या बिम्बौ तु चन्द्रार्कौ वामदक्षिणनेत्रयोः ।।१८।।

निराश्रयौ ततः कृत्वा विशेद्ब्रह्मसनातनम् ।
विज्ञानभैरवेऽप्युक्तं शास्त्रे सिद्धनिषेविते ।।१९।।

सम्प्रदायमिदं सम्यक् शृणु देवि वदाम्यहम् ।
कैवल्यं जायते मध्ये नेत्रयोः शुद्धमानयोः ।।२०।।

सङ्कोचं कर्णयोः कृत्वा अधोद्वारे तथैव च ।
आनच्छाहं कलां ध्यायन् विशेद्ब्रह्म विलक्षणम् ।।२१।।

इति सिद्धमुखोद्गीतं स्वयमेतदुदाहृतम् ।
मन्त्रेणानेन संसिद्धा लभन्ते योगिनीपदम् ।।२२।।

एकदेशसमुद्भूतो मीमांसावनकेसरी ।
हर्षदत्तेति नाम्ना यस्तस्य सूनोरियं कृतिः ।।२३।।

।। समाप्तोऽयं बोधविलासः ।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham